Barcode : 99999990071016
Title - Arth Parakart Baalbasha
Author - Rayibadur
Language - sanskrit
Pages - 147
Publication Year - 1850
Barcode EAN.UCC-13



ञ—हें अक्षर यकार उच्चारण करण्याचें समजावें ॥
ण—हें चिन्ह जा अक्षराला जोडलें आहे तेथें अर्धा एकार समजावा ॥

जाहिरखबर

मुकाम मुंबई बाहेरकोट पांजरापोल अंदर लालबागनामें पोषध शालामां निवास करणारा संवेगी श्री चारित्रप्रधान स्वामीनां तरफथी नीचे लखेला प्रमाणे पुस्तको जेणें जोइए तेओए मंगावी लेवा.

पुस्तक	निछरावलरु०
प्रतिक्रमण आवश्यक सूत्रार्थ	३
सिद्धांत धर्मसार	२
संस्कृत मंजरी शिशु बोध व्याकरण	.।.
श्रीपाल रास	२॥

पुस्तक	निछरावलरु०
प्राकृत बालभाषा अथवा मागधी व्याकरण	२॥
बारव्रतनी टीप	१॥
पीयूषधारा सटीक	४॥
देवचंदजीनी चोवीसी बालाबोध त्रपाठ	२॥
मानतुंग मानवतीनो रास	.॥-

॥ श्रीगणेशायनमः ॥ अथप्राकृतम् ॥ १ ॥ अथशब्दश्चानंतर्यार्थोऽधिकारार्थश्च ॥ प्रकृतिःसंस्कृतंतत्रभवंत तआगतंवाप्राकृतं ॥ संस्कृतानंतरंप्राकृतमधिक्रियते ॥ संस्कृतानंतरंप्राकृतस्यानुशासनंसिद्धसाध्यमानभेदसंस्कृ तयोनेरितस्यलक्षणंनदेश्यस्येतिज्ञापनार्थं ॥ संस्कृतसमंतुसंस्कृतलक्षणेनैवगतार्थं ॥ प्राकृतेचप्रकृतिप्रत्ययलिंग कारकसमाससंज्ञादयःसंस्कृतवद्वेदितव्याः ॥ लोकादितिचवर्तते ॥ तेनऋॠऌॡऐऔङञशषविसर्जनीयप्लुतव र्ज्योवर्णसमाम्नायोलोकादवगंतव्यः ॥ ङञौस्यवर्गसंयुक्तौभवतएव ॥ ऐदौतौचकेषांचित् ॥ कैतवम् ॥ कैअवं ॥ सौं दर्यं । सौअरिअं ॥ कौरवाः । कौरवा ॥ तथाचअस्वरंव्यंजनंद्विवचनंचतुर्थीबहुवचनंचनभवति ॥ बहुलं ॥ २ ॥ बहुलमित्यधिकृतंवेदितव्यमाशास्त्रपरिसमाप्तेः ॥ ततश्च । क्वचित्प्रवृत्तिःक्वचिदप्रवृत्तिःक्वचिद्विभाषाक्वचिदन्यदे वभवति । तच्चयथास्थानंदर्शयिष्यामः ॥ आर्षम् ॥ ३ ॥ ऋषीणामिदमार्षं । आर्षंप्राकृतंबहुलंभवति ॥ तद पियथास्थानंदर्शयिष्यामः ॥ आर्षेहिसर्वेविधयोविकल्प्यंते ॥ दीर्घह्रस्वौमिथोवृत्तौ ॥ ४ ॥ वृत्तौसमासेस्वरा णांदीर्घह्रस्वौबहुलंभवतः । मिथःपरस्परं । तत्रह्रस्वस्यदीर्घः ॥ अंतर्वेदिः । अंतावेई ॥ सप्तविंशतिः । सत्तावी

श्री सौभागमलजी उमरावमलजी दड्डा अजमेरवालों
की तरफ से सादर भेंटः-

सा ॥ क्वचिन्नभवति । जुवइअणो । क्वचिद्विकल्पः । वारीमई । वारिमई ॥ भुजयंतं । भुञ्जायंतं । भुञ्जयंतं ॥ पति गृहं । पईहरं । पइहरं ॥ वेणुवनं । वेलूवणं । वेलुवणं ॥ दीर्घस्यऽह्रस्वः ॥ निअंबसिलखलिअवीइमालस्स ॥ क्वचिद्विकल्पः ॥ जउणाअडं । जउणाञ्अडं ॥ नइसोत्तं । नईसोत्तं ॥ गौरिहरं । गौरीहरं ॥ वहुमुहं । वहूमुहं ॥ पदयोःसंधिर्वा ॥ ५ ॥ संस्कृतोक्तःसंधिःसर्वःप्राकृतेपदयोर्व्यवस्थितविभाषयाभवति ॥ वासेसी । वासइसी ॥ विसमाञ्अवो । विसमञ्आयवो ॥ दहिईसरो । दहीसरो ॥ साऊअयं । साउउअयं ॥ पदयोरितिकिं ॥ पाओ । पई । वत्थाओ । मुद्धाइ । मुद्धाए ॥ महइ । महए ॥ बहुलाधिकारात् क्वचिदेकपदेपि ॥ काहिइ । काही ॥ बिइओ । बीओ ॥ नयुवर्णस्याऽस्वे ॥ ६ ॥ इवर्णस्यउवर्णस्यचास्वेवर्णेपरेसंधिर्नभवति ॥ नवेरिवग्गेविअवञ्आसो । वंदामि अज्जवइरं ॥ दणुइंदरुहिरलित्तो सहइउइंदोनहप्पहावलिअरुणो ॥ संज्झावहुअवऊढो नववारिहवविज्जुलापडिनिन्नो ॥ युवर्णस्येतिकिं ॥ गूढोअरतामरसानुसारिणीनमरपंतिव ॥ अस्वइतिकिं ॥ पुहवीसो ॥ एदोतोःस्वरे ॥ ७ ॥ एकारओकारयोःस्वरेपरेसंधिर्नभवति ॥ बहुआएनहुल्लिहणे आबंधंतीइकंचुअंअंगे ॥ मअरद्ध

सरथोरणि धाराच्छेउव्वदीसंति ॥ १ ॥ उवमासुअपज्जत्तेभ कलभदंतावहासमूरुजुअं ॥ तंचेअमलिअविसदंड वि
रसमालक्खिमोएण्हिं ॥ २ ॥ अहोअच्छरिअं ॥ एदोतोरितिकिं ॥ अत्थालोअणतरला इयरकईणंनमंतिबुद्धीओ ॥
अच्छक्खिअनिरारंभ मितिहिअयंकइंदाणं ॥ १ ॥ स्वरस्योद्वृत्ते ॥ ८ ॥ व्यञ्जनसंपृक्तःस्वरोव्यञ्जनेलुप्ते
योऽवशिष्यते सउद्वृत्तइहोच्यते ॥ स्वरस्यउद्वृत्तेस्वरेपरेसंधिर्नभवति ॥ गयणेक्खिअगंधउडिंकुणंति ॥ निसाअ
रो । निसिअरो ॥ रयणिअरो । मणुअत्तं ॥ बहुलाधिकारात् क्वचिद्विकल्पः ॥ कुम्नयारो । कुम्नारो ॥ सुउरिसो । सू
रिसो ॥ क्वचित्संधिरेव ॥ सालाहणो । चक्काओ ॥ अतएवप्रतिषेधात्समासेपिस्वरस्यसंधौनिन्नपदत्वम्॥त्यादेः॥९॥
तिबादीनांस्वरस्यस्वरेपरेसंधिर्नभवति ॥ भवतिइह । होइइह ॥ लुक् ॥ १० ॥ स्वरस्यस्वरेपरेबहुलंलुग्भवति ॥
त्रिदशेशः । तिअसीसो । निश्वासोच्छ्वासौ । नीसासूसासा ॥ अंत्यव्यंजनस्य॥११॥ शब्दानांयदंत्यव्यंजनंतस्यलु
ग्भवति ॥ जाव । ताव । जसो । तमो । जम्मो ॥ समासेतुवाक्यविभक्त्यपेक्षायामंत्यत्वमनंत्यत्वंचतेनोभयमपिभव
ति ॥ सन्निक्षुः । सन्निक्खू ॥ सज्जनः । सजणो ॥ एतद्गुणाः । एअगुणा॥ तद्गुणाः । तग्गुणाः ॥ नश्रदुदोः ॥ १२ ॥

अद्उद्इत्येतयोरंत्यव्यंजनस्यलुग्नभवति ॥ सद्दहिअं । सद्धा । उग्गयं । उन्नयं ॥ निर्दुरोर्वा ॥ १३ ॥ निर्दुर्इत्येतयोरंत्यव्यंजनस्यवालुग्नन्नवति ॥ निस्सहं । नीसहं ॥ दुस्सहो । दूसहो ॥ दुक्खिओ । दुहिओ ॥ स्वरेऽन्तरश्च ॥ १४ ॥ अन्तरोनिर्दुरोश्चान्त्यव्यंजनस्यस्वरेपरेलुग्नन्नवति ॥ अंतरप्पा ॥ निरंतरं ॥ निरवसेसं ॥ दुरुत्तरं ॥ दुरवगाहं ॥ क्वचिद्भवत्यपि ॥ अंतोवरि ॥ स्त्रियामादविद्युतः ॥ १५ ॥ स्त्रियांवर्त्तमानस्यशब्दस्यांत्यव्यंजनस्यात्वंभवति विद्युच्छब्दंवर्जयित्वा ॥ लुगपवादः ॥ सरित् । सरिआ ॥ प्रतिपद् । पाडिवआ ॥ संपद् । संपआ । बहुलाधिकारादीषत्स्पृष्टतरयश्रुतिरपि ॥ सरिआ ॥ पाडिवआ ॥ संपआ ॥ अविद्युतइतिकिं ॥ वीहू ॥ रोरा ॥ १६ ॥ स्त्रियांवर्त्तमानस्यांत्यस्यरेफस्यराइत्यादेशोभवति ॥ आत्वापवादः ॥ गिरा ॥ धुरा ॥ पुरा ॥ क्षुधोहा ॥ १७ ॥ क्षुध्शब्दस्यांत्यव्यंजनस्यहादेशोन्नवति ॥ छुहा ॥ शरदादेरत् ॥ १८ ॥ शरदादेरंत्यव्यंजनस्याद्भवति ॥ शरद् । सरओ ॥ निषक् । निषओ ॥ दिक्प्रावृषोःसः ॥ १९ ॥ एतयोरंत्यव्यंजनस्यसोन्नवति ॥ दिसा ॥ पाउसो ॥ आयुरप्सरसोर्वा ॥ २० ॥ एतयोरंत्यव्यंजनस्यसोवान्नवति ॥ दीहाउसो । दीहाऊ ॥

अच्छरसा। अच्छरा ॥ ककुभोहः ॥ २१ ॥ ककुभशब्दस्यांत्यव्यंजनस्यहोभवति ॥ कउहा॥धनुषोव॥॥२२॥ धनुःशब्दस्यांत्यव्यंजनस्यहोवाभवति ॥ धणुहं । धणू ॥ मोनुस्वारः ॥ २३ ॥ अंत्यमकारस्यानुस्वारो भवति ॥ जलं फलं वच्छं गिरिं पेच्छ ॥ क्वचिदनंत्यस्यापि ॥ वणम्मि । वणंमि ॥ वास्वरेमश्च ॥ २४ ॥ अंत्यमकारस्यस्वरेपरेऽनुस्वारोवाभवति पक्षेलुगपवादोमस्यमकारश्चभवति ॥ वंदेउसभंअजिअं ॥ उसभमजिअं चवंदे ॥ बहुलाधिकारादन्यस्यापिव्यंजनस्यमकारः ॥ साक्षात् । सक्खं ॥ यत् । जं ॥ तत् । तं ॥ विष्वक् । वीसुं ॥ पृथक् । पिहं ॥ सम्यक् । सम्मं ॥ इहं । इहयं ॥ आलेद्वयमित्यादि ॥ ङञणनोव्यंजने ॥ २५ ॥ ङ ञ ण न इत्येषांस्थानेव्यंजनेपरेअनुस्वारोभवति ॥ ङ । पङ्तिः । पंती ॥पराङ्मुखः।परंमुहो ॥ ञ ॥ कञ्चुकः । कंचुओ॥ लाञ्छनं । लंछनं ॥ ण । षण्मुखः । छंमुहो॥ उत्कण्ठा । उक्कंठा ॥ न । सन्ध्या । संझा ॥ विन्ध्यः । विंझो ॥ वक्रादावंतः ॥ २६ ॥ वक्रादिषुयथादर्शनंप्रथमादेःस्वरस्यांतआगमरूपोऽनुस्वारोभवति । वंकं । तंसं । अंसू । मंसू रुंछं गुंछं मुंढा पंसू बुंधं कंकोडो कुंपलं दंसणं विंछिओ गिंठी मंजारो एष्वाद्यस्यासीत् ॥ वयंसो मणंसी मणं

श्रद्उद्इत्येतयोरंत्यव्यंजनस्यलुग्नभवति ॥ सद्दहिअं । सद्धा । उग्गयं । उन्नयं ॥ निर्दुरोर्वा ॥ १३ ॥ निर्दुर्इत्येतयोरंत्यव्यंजनस्यवालुग्नन्नवति ॥ निस्सहं । नीसहं ॥ दुस्सहो । दूसहो ॥ दुक्खिअो । दुहिओ ॥ स्वरेऽन्तरश्च ॥ १४ ॥ अन्तरोनिर्दुरोश्चान्त्यव्यंजनस्यस्वरेपरेलुग्नन्नवति ॥ अंतरप्पा ॥ निरंतरं ॥ निरवसेसं ॥ दुरुत्तरं ॥ दुरवगाहं ॥ क्वचिद्भवत्यपि ॥ अंतोवरि ॥ स्त्रियामादविद्युतः ॥ १५ ॥ स्त्रियांवर्त्तमानस्यशब्दस्यांत्यव्यंजनस्यात्वंभवति विद्युच्छब्दंवर्जयित्वा ॥ लुगपवादः ॥ सरित् । सरिआ ॥ प्रतिपद् । पाडिवआ ॥ संपद् । संपआ । बहुलाधिकारादीषत्स्पृष्टतरयश्रुतिरपि ॥ सरिआ ॥ पाडिवआ ॥ संपआ ॥ अविद्युतइतिकिं ॥ वीहू ॥ रोरा ॥ १६ ॥ स्त्रियांवर्त्तमानस्यांत्यस्यरेफस्यराइत्यादेशोभवति ॥ आत्वापवादः ॥ गिरा ॥ धुरा ॥ पुरा ॥ क्षुधोहा ॥ १७ ॥ क्षुध्शब्दस्यांत्यव्यंजनस्यहादेशोन्नवति ॥ छुहा ॥ शरदादेरत् ॥ १८ ॥ शरदादेरंत्यव्यंजनस्याद्भवति ॥ शरद् । सरओ ॥ निषध् । निसढो ॥ दिक्प्रावृषोःसः ॥ १९ ॥ एतयोरंत्यव्यंजनस्यसोन्नवति ॥ दिसा ॥ पाउसो ॥ आयुरप्सरसोर्वा ॥ २० ॥ एतयोरंत्यव्यंजनस्यसोवान्नवति ॥ दीहाउसो । दीहाऊ ॥

अच्छरसा। अच्छरा ॥ ककुभोहः ॥ २१ ॥ ककुभशब्दस्यांत्यव्यंजनस्यहोभवति ॥ कउहा॥धनुषोवा॥२२॥ धनुःशब्दस्यांत्यव्यंजनस्यहोवाभवति ॥ धणुहं । धणू ॥ मोनुस्वारः ॥ २३ ॥ अंत्यमकारस्यानुस्वारो भवति ॥ जलं फलं वच्छं गिरिं पेच्छ ॥ क्वचिदनंत्यस्यापि ॥ वणम्मि । वणंमि ॥ वास्वरेमश्च ॥ २४ ॥ अं त्यमकारस्यस्वरेपरेऽनुस्वारोवाभवति पक्षेलुगपवादोमस्यमकारश्चभवति ॥ वंदेउसभंअजिअं ॥ उसभमजिअं चवंदे ॥ बहुलाधिकारादन्यस्यापिव्यंजनस्यमकारः ॥ साक्षात् । सक्खं ॥ यत् । जं ॥ तत् । तं ॥ विष्वक् । वीसुं ॥ पृथक् । पिहं ॥ सम्यक् । सम्मं ॥ इहं । इहयं ॥ आलेद्वयमित्यादि ॥ ङञणनोव्यंजने ॥ २५ ॥ ङ ञ ण न इत्येषांस्थानेव्यंजनेपरेअनुस्वारोभवति ॥ ङ । पङ्क्तिः । पंती ॥पराङ्मुखः।परंमुहो ॥ ञ ॥ कञ्चुकः । कंचुओ॥ लाञ्छनं । लंछनं ॥ ण । षण्मुखः । छंमुहो॥ उत्कण्ठा । उक्कंठा ॥ न । सन्ध्या । संझा ॥ विन्ध्यः । विंझो ॥ वक्रा दावंतः ॥ २६ ॥ यक्रादिषुयथादर्शनंप्रथमादेःस्वरस्यांतआगमरूपोऽनुस्वारोभवति । वंकं । तंसं । अंसू । मंसू पुंछे गुंछे मुंढा पंसू बुंधं कंकोडो कुंपलं बंसणं विंछिओ गिंठी मंजारो एष्वाद्यस्यासीत् ॥ वयंसो मणंसी मणं

सिणी मणंसिला वडंसुआ एषुद्वितीयस्य ॥ अवरिं । अणिउंतयं । अइमुंतयं । अनयोस्तृतीयस्य ॥ वक्र श्यश्र श्मश्रु श्मश्रु पुच्छ गुच्छ मूर्द्धन् पर्शु बुध्न ककौट कुड्मल दर्शन वृश्चिक गृष्टि मार्जार वयस्य मनस्विन् मनस्विनी मनःशिला प्रतिश्रुत् उपरि अतिमुक्तक इत्यादि ॥ क्वचिच्छंदःपूरणेपि ॥ देवंनागसुवण्णं ॥ क्वचिन्नभवति ॥ गिट्ठी। मज्जारो। मणसिला ॥ आर्षेमणोसिला। अइमुत्तयं ॥ क्त्वास्यादेर्णस्वोर्वा ॥ २७ ॥ क्त्वायाःस्यादीनांचयौ णसू तयोरनुस्वारोऽतोवाऽनवति ॥ क्त्वा ॥ काऊणं । काऊण ॥ काउआणं । काउआण ॥ स्यादि ॥ वच्छेणं । वच्छे ण ॥ वच्छेसुं । वच्छेसु ॥ णस्वोरितिकिं ॥ करिअ । अग्गिणो ॥ विंशत्यादेर्लुक् ॥ २८ ॥ विंशत्यादीनामनुस्वा रस्यलुग्नवति ॥ विंशतिः । वीसा ॥ त्रिंशत् । तीसा ॥ संस्कृतं । सक्कयं ॥ संस्कारः । सक्कारो इत्यादि ॥ मांसा देर्वा ॥ २९ ॥ मांसादेरनुस्वारस्यलुग्वाऽनवति ॥ मासं । मंसं ॥ मासलं । मंसलं ॥ कासं । कंसं ॥ पासू । पंसू ॥ कह । कहं ॥ एव । एवं । नूण । नूणं ॥ इयाणि । इयाणिं ॥ दाणि । दाणिं ॥ किं करेमि । किं करेमि ॥ समुहं । संमुहं ॥ किसुअं । किंसुअं ॥ सीहो । सिंघो ॥ मांस । मांसल । कांस्य । पांसु । कथं । एवं । नूनं । इदानीं । दानीं ।

किं । सन्मुख । किंशुक । सिंह इत्यादि ॥ वर्गेऽत्योवा ॥ ३० ॥ अनुस्वारस्यवर्गेपरेप्रत्यासत्तेस्तस्यैववर्गस्यां
स्योवाजायते ॥ पङ्को । पंको ॥ सङ्खो । संखो ॥ अङ्गणं । अंगणं ॥ लङ्घणं । लंघणं ॥ कञ्चुओ । कंचुओ ॥
लञ्छणं । लंछणं ॥ अञ्जिअं । अंजिअं ॥ सञ्झा । संझा ॥ कण्ठओ । कंठओ ॥ उक्कण्ठा । उक्कंठा ॥ कण्डं ।
कंडं ॥ सण्ढो । संढो ॥ अन्तरं । अंतरं ॥ पन्थो । पंथो ॥ चन्दो । चंदो ॥ बन्धवो । बंधवो ॥ कम्पइ । कंपइ ॥ वम्फ
इ । वंफइ ॥ कलम्बो । कलंबो ॥ आरम्भो । आरंभो ॥ वर्गइति किं ॥ संसओ ॥ संहरइ ॥ नित्यमिच्छंत्यन्ये ॥
प्रावृट्शरत्तरणयःपुंसि ॥ ३१ ॥ प्रावृद् शरद् तरणि इत्येतेशब्दाःपुंसिपुल्लिंगेप्रयोक्तव्याः ॥ पाउसो । सर
ओ । एसतरणी ॥ तरणिशब्दस्यपुंस्त्रीलिंगत्वेननियमार्थमुपादानं ॥ स्नमदामशिरोनभः ॥ ३२ ॥ दामन् शि
रस् नभस् वर्जितंसकारांतंनकारांतंचशब्दरूपंपुंसिप्रयोक्तव्यं ॥ सांतं ॥ जसो । पओ । तमो । तेओ । उरो ॥ नांतं ।
जम्मो । नम्मो । मम्मो । अदामशिरोनभइतिकिं ॥ दामं । सिरं । नहं ॥ यच्च सेयं । वयं । सुमणं । सम्मं । चम्म
मितिदृश्यते तद्बहुलाधिकारात् ॥ वाक्ष्यर्थवचनाद्याः ॥ ३३ ॥ अक्षिपर्यायावचनादयश्चशब्दाःपुंसि वा प्र

॥ योक्तव्याः ॥ अक्ष्यर्थाः ॥ अज्जविसासवइ ते अच्छी ॥ नच्चाविआइंतेणम्हअच्छीइं ॥ अंजलयादिपाठादक्षिश
ब्दःस्त्रीलिंगेपि ॥ एसाअच्छी । चक्खू । चक्खूइं ॥ नयणा । नयणाइं ॥ लोअणा । लोअणाइं ॥ वचनादिः॥वज्र
णा । वज्रणाइं ॥ विज्जुणा । विज्जुए ॥ कुलो । कुलं ॥ छंदो । छंदं ॥ माहप्पं । माहप्पो । दुक्खा । दुक्खाइं ॥
भाज्रणा । भाज्रणाइं इत्यादि वचनादयः ॥ नेत्ता । नेत्ताइं ॥ कमला । कमलाइं इत्यादितुसंस्कृतवदेवसि
द्धं ॥ गुणाद्याःक्लीबेवा ॥ ३४ ॥ गुणादयःक्लीबेवाप्रयोक्तव्याः ॥ गुणाइं । गुणा॥ विहवेहिंगुणाइंमग्गंति ॥ दे
वाणि । देवा॥ बिंदूइं । बिंदुणो ॥ खग्गं । खग्गो ॥ मंडलग्गं । मंडलग्गो ॥ कररुहं । कररुहो ॥ रुक्खाइं । रुक्खा
इत्यादि ॥ इतिगुणादयः ॥ वेमांऽजल्याद्याःस्त्रियां॥ ३५ ॥ इमांताअंजल्यादयश्चशब्दाःस्त्रियांवाप्रयोक्तव्याः॥
एसा गरिमा । एसगरिमा ॥ एसामहिमा । एसमहिमा ॥ एसानिल्लज्जिमा । एसनिल्लज्जिमा ॥ एसाधुत्तिमा । एस
धुत्तिमा ॥ अंजल्यादि ॥ एसाअंजली । एसअंजली ॥ पिट्ठी । पिट्ठं ॥ पृष्ठमित्वेकृतेस्त्रियामेवेत्यन्ये ॥ अच्छी । अ
च्छिं ॥ पण्हा । पण्हो ॥ चोरिआ । चोरिअं ॥ एवं कुच्छी । वली । निही । विही । रस्सी । गंठी इत्यंजल्यादयः ॥

गङ्गा गङ्गोङ्गतितुसंस्कृतवदेवसिद्धं ॥ इमेतितंत्रेणत्वादेशस्यडिमाङ्त्यस्यपृथ्व्यादीम्नश्चसंग्रहः ॥ त्वादेशस्यस्त्रीत्व
मेवेच्छंत्यन्ये ॥ बाहोरात् ॥ ३६ ॥ बाहुशब्दस्यस्त्रियामाकारोंतादेशोभवति ॥ बाहाएजेणधरिओएक्काए ॥ स्त्रि
यामित्येव ॥ वामेअरोबाहू ॥ अतोडोविसर्गस्य ॥ ३७ ॥ संस्कृतलक्षणोत्पन्नस्यातःपरस्यविसर्गस्यस्थानेडो
इत्यादेशोभवति ॥ सर्वतः । सव्वडो ॥ पुरतः । पुरओ ॥ अग्रतः । अग्गओ ॥ मार्गतः । मग्गओ ॥ एवंसिद्धाव
स्थापेक्षया ॥ भवतः । भवओ ॥ भवंतः । भवंतो ॥ संतः । संतो ॥ कुतः । कुदो ॥ निष्प्रतीउत्परीमाल्यस्थो
र्वा ॥ ३८ ॥ निरप्रतिइत्येतौमाल्यशब्देस्थाधातौचपरेयथासंख्यंउत्परिङ्इत्येवंरूपौवाभवतः ॥ अभेदनिर्देशः
सर्वादेशार्थः ॥ उमालं । निम्मलं । उमालयं वहइ ॥ परिट्ठा । पइट्ठा ॥ परिट्ठिअं । पइट्ठिअं ॥ आदेः ॥३९॥
आदेरित्यधिकारःकगचजेत्यादिसूत्रात्प्राग्विशेषेवेदितव्यः ॥ त्यदाद्यव्ययात्तत्स्वरस्यलुक् ॥ ४० ॥ त्यदा
देरव्ययाच्चपरस्यतयोरेवत्यदाद्यव्ययस्यादेःस्वरस्यबहुलंलुग्भवति ॥ अम्हेत्थ । अम्हेएत्थ ॥ जइमा । जइइमा ॥
जइहं । जइअहं ॥ पदादपेर्वा ॥ ४१ ॥ पदात्परस्यअपेरव्ययस्यादेर्लुग्वाभवति ॥ तंपि । तमवि ॥ किंपि । कि

स्वारादितिप्रतिषेधात्सर्वत्रानादौशेषादेशयोर्द्वित्वमितिद्वित्वाभावः ॥ अतःसमृध्यादौवा ॥ ४४ ॥ समृद्धिइ त्येवमादिपुशब्देष्वादेरकारस्यदीर्घोभवति ॥ सामिद्धी । समिद्धी ॥ पासिद्धी । पसिद्धी ॥ पाअडं । पअडं ॥ पाडि वआ । पडिवआ ॥ पासुत्तो । पसुत्तो ॥ पाडिसिद्धी । पडिसिद्धी ॥ सारिच्छो । सरिच्छो ॥ माणंसी । मणंसी ॥ माणं सिणी । मणंसिणी ॥ आहिआई । अहिआई ॥ पारोहो । परोहो ॥ पावासू । पवासू ॥ पाडिप्फद्धी । पडिप्फद्धी ॥ समृद्धि । प्रसिद्धि । प्रकट । प्रतिपत् । प्रसुप्त । प्रतिसिद्धि । सदृक्ष । मनस्विन् । मनस्विनी । अभियाति । प्ररोह । प्र वासिन् । प्रतिस्पर्द्धिन् ॥ आकृतिगणोयं ॥ तेनअस्पर्शः । आफंसो । परकीयं । पारकेरं । पारक्कं । प्रवचनं । पावअणं चउरंतं । चाउरंतमित्याद्यपिभवति ॥ दक्षिणेहे ॥ ४५ ॥ हक्षिणशब्देआदेरतोहेपरेदीर्घोभवति ॥ दाहिणो ॥ हेइतिकिं ॥ दक्खिणो ॥ इःस्वप्नादौ ॥ ४६ ॥ स्वप्नइत्येवमादिष्वादेरस्यइत्वंभवति ॥ सिविणो । सिमिणो ॥ आर्षेउकारोपि ॥ सुमिणो । ईसि । वेडिसो । विलिअं । विअणं । मुइंगो । किविणो । उत्तिमो । मिरियं । दिण्णं ॥ बहु लाधिकाराण्णत्वाऽभावेनभवति ॥ दत्तं । देवदत्तो ॥ स्वप्न । ईषत् । वेतस । व्यलीक । व्यजन । मृदङ्ग । कृपण ।

उत्तम । मरिच । दत्त इत्यादि ॥ पक्काङ्गारललाटेवा ॥ ४७ ॥ एंप्वादेरतइत्वंयाभवति ॥ पिक्कं । पक्कं ॥ इंगालो । अंगारो ॥ णिडालं । णडालं ॥ मध्यमकतमेद्वितीयस्य ॥ ४८ ॥ मध्यमकतमशब्देद्वितीयस्यातइत्वंभवति ॥ मज्झिमो । कइमो ॥ सप्तपर्णेवा ॥ ४९ ॥ सप्तपर्णेद्वितीयस्याऽतइत्वंवाभवति ॥ छत्तिवण्णो । छत्तवण्णो ॥ मयट्यइर्वा ॥ ५० ॥ मयट्प्रत्ययेऽयादेरतःस्थानेअइइत्यादेशोवाभवति ॥ विषमयः । विसमइओ । विसमओ ॥ ईर्हरेवा ॥ ५१ ॥ हरशब्देआदेरतईर्वाभवति ॥ हीरो । हरो ॥ ध्वनिविष्वचोरुः ॥ ५२ ॥ अनयोरादेरस्यउत्वंभवति ॥ झुणी । वीसुं । कथं सुणओ ॥ शुनकइतिप्रकृत्यंतरस्य ॥ स्वनशब्दस्यतुसा साणोइतिप्रयोगौभवतः ॥ चण्डखण्डितेणावा ॥ ५३ ॥ अनयोरादेरस्यणकारेणसहितस्यउत्वंवाभवति ॥ चुडं । चंण्डं ॥ खुडिओ । खण्डिओ ॥ गवयेवः ॥ ५४ ॥ गवयशब्देवकाराऽकारस्यउत्वंभवति ॥ गउओ । गउआ ॥ प्रथमेपथोर्वा ॥ ५५ ॥ प्रथमशब्देपकारथकारयोरकारस्ययुगपत्क्रमेणचउकारोवाभवति ॥ पुढुमं । पुढमं । पटुमं । पढमं ॥ ज्ञोणत्वेऽभिज्ञादौ ॥५६॥ अभिज्ञएवंप्रकारेषुज्ञस्यणत्वेकृतेज्ञस्यैवाऽतउत्वंभवति ॥ अहिण्णू । साणूं ।

कयण्णू । आगमण्णू । णत्वइतिकिं ॥ अहिज्जो । सव्वज्जो ॥ अभिज्ञादाविति किं ॥ प्राज्ञः । पण्णो ॥ येपांज्ञस्यणत्वे उत्वंदृश्यतेतेअभिज्ञादयः ॥ एच्छय्यादौ ॥ ५७ ॥ शय्यादिष्वादेरस्यएत्वंवाभवति ॥ सेज्जा । सुंदेरं । गेंदुज्झं । एत्थं ॥ शय्या । सौंदर्य । कंदुक । अत्र ॥ आर्षेपुरेकम्मं ॥ वल्युत्करपर्यंताश्चर्यैवा ॥ ५८ ॥ एष्वादेरस्यएत्वंवा भवति ॥ वेल्ली । वल्ली ॥ उक्केरो । उक्करो ॥ पेरंतो । पज्जंतो ॥ अच्छेरं । अच्छरिअं । अच्छअरं । अच्छरिज्जं । अच्छ रीयं ॥ ब्रह्मचर्येचः ॥ ५९ ॥ ब्रह्मचर्यशब्देचस्याऽतएत्वंभवति ॥ बम्भचेरं ॥ तोंऽतरि ॥ ६० ॥ अंतरशब्देतस्या ऽतएत्वंभवति ॥ अंतःपुरं । अंतेउरं ॥ अंतश्चारी । अंतेआरी ॥ क्वचिन्नभवति ॥ अंतग्गअं । अंतोवीसंभनिवेसि आण ॥ ओत्पद्मे ॥ ६१ ॥ पद्मशब्देआदेरतओत्वंभवति ॥ पोम्मं ॥ पद्मछद्मेतिविश्लेषेनभवति ॥ पउमं ॥ नम स्कारपरस्परेद्वितीयस्य ॥ ६२ ॥ अनयोर्द्वितीयस्याऽतओत्वंभवति ॥ नमोक्कारो । परोप्परं ॥ वाऽर्षे ॥ ६३ ॥ अर्पयतौधातौआदेरस्यओत्वंवाभवति ॥ ओप्पेइ । अप्पेइ ॥ ओप्पिअं । अप्पिअं ॥ स्वपावुच्च ॥ ६४ ॥ स्वपि तौधातावादेरस्यओत्उच्चभवति ॥ सोवइ । सुवइ ॥ नात्पुनर्यादाइवा ॥ ६५ ॥ नञःपरेपुनःशब्देआदेरस्य

हारो ॥ पञ्चरो । पञ्चारो॥प्रकारःप्रचारोवा ॥ पत्थवो । पत्थावो ॥ क्वचिन्नभवति ॥ रागः । राओ ॥ महाराष्ट्रे ॥ ६९॥ महाराष्ट्रेशब्देआदेराकारस्याद्वाभवति ॥ मरहट्ठं । मारहट्ठो ॥ मांसादिष्वनुस्वारे ॥ ७० ॥ मांसप्रकारेष्वनुस्वारेस त्यादेरातोऽद्भवति ॥ मंसं । पंसू । पंसणो । कंसं । कंसिओ । वंसिओ । पंडवो । संसिद्धिओ । संजत्तिओ॥ अनुस्वार इतिकिं ॥ मासं । पासू ॥ मांस । पांसु । पांसन । कांस्य । कांसिक । वांशिक । पांडव । सांसिद्धिक । सांयात्रिकइत्यादि ॥ श्यामाकेमः ॥७१॥ श्यामाकेमस्याद्भवति ॥ सामओ ॥ इःसदादौवा ॥ ७२ ॥ सदादिषुशब्देषुआतइत्वंवा भवति ॥ सइ । सआ ॥ निसिअरो । निसाअरो ॥ कुप्पिसो । कुप्पासो ॥ आचार्येचोऽच्च ॥ ७३ ॥ आचार्यशब्दे चस्यातइत्वमत्वंचभवति ॥ आइरिओ । आअरिओ ॥ ईस्त्यानखल्वाटे ॥ ७४ ॥ स्त्यानखल्वाटयोरादेरातई र्भवति ॥ ठीणं। थीणं ॥ थिण्णं । खल्लीडो ॥ संखायमितितुसमःस्त्यःखाइतिखादेशोसिद्धं॥उःसास्नास्तावके॥७५॥ अनयोरादेरातउत्वंभवति ॥ सुण्हा । थुवओ ॥ ऊद्वाऽऽसारे ॥ ७६॥ आसारेआदेरातऊद्वाभवति ॥ ऊसारो । आ सारो ॥ आर्यायांर्यःश्वश्वां ॥ ७७.॥ आर्याशब्देश्वश्वांवाच्यायांर्यस्यातऊर्भवति ॥ अज्जू॥ श्वश्वामितिकिं॥ अ

ज्जा ॥ **एद्ग्राह्ये ॥ ७८ ॥** ग्राह्यशब्देआदेरातएद्भवति ॥ गेज्झं ॥ **द्वारेवा ॥ ७९ ॥** द्वारशब्देआतएद्वाभवति ॥ देरं ॥ पक्षे । दुआरं । दारं । वारं ॥ कथं नेरइओ । नारइओ । नैरयिकनारयिकशब्दयोर्भविष्यति ॥ आर्षेअन्यत्रापि ॥ पच्छेकम्मंअसहेज्जदेवासुर ॥ **पारापतेरोवा ॥ ८० ॥** पारापतशब्देरस्थस्यातएद्वाभवति ॥ पारेवओ । पारावओ ॥ **मात्रटिवा ॥ ८१ ॥** मात्रट्प्रत्ययेआतएद्वाभवति ॥ एत्तिअमेत्तं । एत्तिअमत्तं ॥ बहुलाधिकारात्क्वचिन्मात्रशब्देपि ॥ भोअणमेत्तं ॥ **उदोद्वांऽऽर्द्रे ॥८२॥** आर्द्रशब्देआदेरातउदोऽवाभवतः ॥ उल्लं । ओल्लं ॥ पक्षे । अल्लं । अदं । बाहसलिलपवहेणउल्लेइ ॥ **ओदाल्यांपंक्तौ ॥ ८३ ॥** आलीशब्देपंक्तिवाचिनिआतओत्वंभवति ॥ ओली ॥ पंक्ता वितिकिं ॥ आलीसखी ॥ **ह्रस्वःसंयोगेदीर्घस्य ॥ ८४ ॥** यथादर्शनंसंयोगेपरेह्रस्वोभवति ॥ आत् । आम्रम् । अम्बं ॥ ताम्रम् । तम्बं ॥ विरहाग्निः । विरहग्गी ॥ आस्यम् । अस्सं ॥ ईत् ॥ मुनीन्द्रः । मुणिंदो ॥ तीर्थम् । तित्थं ॥ ऊत् ॥ गुरुच्छायाः । गुरुच्छावा ॥ चूर्णः । चुण्णो ॥ एत् ॥ नरेन्द्रः । नरिंदो ॥ म्लेच्छः । मिलिच्छो दिट्ठिक्खणवट्टं ॥ ओत् ॥ अधरोष्ठः । अहरुट्ठं ॥ नीलोत्पलं । नीलुप्पलं ॥ संयोगइतिकिं । आयासं ॥ ईसरो । ऊसवो ॥ **इतएद्वा ॥ ८५ ॥**

संयोगडतिवर्तते ॥ आदेरिकारस्यसंयोगेपरेएकारोवाभवति ॥ पेण्डं । पिण्डं ॥ धम्मेल्लं । धम्मिल्लं ॥ सेन्दूर । सिन्दूरं ॥ वेण्हू । विण्हू ॥ पेट्टं । पिट्टं ॥ वेल्लं । विल्लं ॥ क्वचिन्नभवति ॥ चित्ता ॥ किंशुकेवा ॥ ८६ ॥ किंशुकेशब्देआदेरितएकारोवाभवति ॥ केसुअं । किंसुअं ॥ मिरायाम् ॥ ८७ ॥ मिराशब्देइतएकारोभवति ॥ मेरा ॥ पथिपृथिवीप्रतिश्रुन्मूषिकहरिद्राविभीतकेष्वत् ॥ ८८ ॥ एष्वादेरितोऽकारोभवति ॥ पहो । पुहई । पुढवी ॥ पडंसुआ । मूसओ । हलद्दी । हलद्दा ॥ बहेडओ ॥ पंथंकिरदेसित्तेतितुपथिशब्दार्थसमानार्थस्यपन्थशब्दस्यभविष्यति ॥ हरिद्रायांविकल्पइत्यन्ये ॥ हलिद्दी । हलिद्दा ॥ शिथिलेंगुदेवा ॥ ८९ ॥ अनयोरादेरितोऽद्वाभवति ॥ सढिलं । पसढिलं । सिढिलं । पसिढिलं । अंगुअं । इंगुअं ॥ निर्मितशब्देतुवाआत्वंनविधेयं ॥ निर्मातनिर्मितशब्दाभ्यामेवसिद्धेः॥ तित्तिरौरः ॥ ९० ॥ तित्तिरशब्देरस्येतोऽद्भवति ॥ तित्तिरो ॥ इतौतोवाक्यादौ ॥ ९१ ॥ वाक्यादिभूतेइतिशब्देयस्तस्तत्संबंधिनइकारस्याऽकारोभवति ॥ इअजंपिआवसाणे । इअविअसिअकुसुमसरो ॥ वाक्यादावितिकिं ॥ पिउत्ति । पुरिसोत्ति ॥ ईर्जिव्हासिंहत्रिंशद्विंशतौत्या ॥ ९२ ॥ जिव्हादिषुइकारस्यतिशब्देनसहईर्भ

ब्देईतआद्रवति ॥ कम्हारा ॥ पानीयादिष्वित् ॥ १०१ ॥ पानीयादिषुशब्देषुईतइद्भवति ॥ पाणिअं । अलिअं । जिअइ । जिअउ । विलिअं । करिसो । सिरिसो । दुइअं । तइअं । गहिरं । उवणिअं । आणिअं । पलिविअं। ओसिअंतं । पसिअ । गहिअं । वम्मिओ । तआणिं ॥ पानीय । अलीक । जीवति । जीवतु । व्रीडित । करीष । शिरीष । द्वितीय । तृतीय । गभीर । उपनीत । आनीत । प्रदीपित । अवसीदत् । प्रसीद । गृहीत । वल्मीक । तदानीं इतिपानीयादयः ॥ बहुलाधिकारादेषुक्वचिन्नित्यंक्वचिद्विकल्पः ॥ तेनपाणीअं अलीअं जीअइ करीसो उवणीओ इत्यादिसिद्धं ॥ उज्जीर्णे ॥ २ ॥ जीर्णशब्देईतउद्भवति ॥ जुण्णसुरा ॥ क्वचिन्नभवति ॥ जिण्णेभोअणमत्तेओ ॥ ऊहीनविहीनेवा ॥ ३ ॥ अनयोरीतऊत्वंवाभवति ॥ हूणो । हीणो ॥ विहीणो । विहूणो ॥ विहीनइतिकिं ॥पहीणजरमरणा ॥ तीर्थेहे ॥ ४ ॥ तीर्थशब्देहेसतिईतऊत्वंभवति ॥ तूहं ॥ हेइतिकिं ॥ तित्थं ॥ एत्पीयूषापीडबिभीतककीट्टशेट्टशे ॥ ५ ॥ एष्वीतएत्वंभवति ॥ पेऊसं । आमेलो । बहेडओ । केरिसो । एरिसो ॥ नीडपीठेवा ॥ ॥ ६ ॥ अनयोरीतएत्वंवाभवति ॥ नेडं । नीडं ॥ पेढं । पीढं ॥ उतोमुकुलादिष्वत् ॥ ७ ॥ मुकुलइत्येवमादिषु

वति ॥ जीहा । सीहो । तीसा । वीसा ॥ बहुलाधिकारात्क्वचिन्नभवति ॥ सिंहदत्तो । सिंहराओ ॥ लुंकिनिरः ॥ ९३॥ निर्उपसर्गस्यरेफलोपेसतिइतईकारोभवति ॥ नीसरइ । नीसासो ॥ लुकीतिकिं ॥ निन्नओ । निस्सहाइं अंगाइं ॥ द्विन्योरुत् ॥ ९४ ॥ द्विशब्देनावुपसर्गेचइतउद्भवति ॥ दु ॥ दुमत्तो । दुआई । दुविहो । दुरेहो । दुवअणं॥ बहुलाधिकारात्क्वचिद्विकल्पः ॥ दुउणो । विउणो । दुइओ। बिइओ॥ क्वचिन्नभवति ॥ द्विजः । दिओ ॥ द्विरदः । दिरओ ॥ क्वचिदोत्वमपि ॥ दोवअणं ॥ नि ॥ णुमज्जइ । णुमन्नो ॥ क्वचिन्नभवति ॥ निवडइ ॥ प्रवासीक्षौ ॥ ९५ ॥ अनयोरादेरितउत्वंभवति ॥ पावासुओ । उच्छू॥ युधिष्ठिरेवा ॥ ९६ ॥ युधिष्ठिरशब्देआदेरितउत्वंवाभवति ॥ जहुट्ठिलो । जहिट्ठिलो ॥ ओच्चद्विधाकृगः ॥ ९७ ॥ द्विधाशब्देकृग्धातोःप्रयोगेइतओत्वंचकारादुत्वंचभवति ॥ दोहाकिज्जइ । दुहाकिज्जइ ॥ दोहाइअं । दुहाइअं ॥ कृगइतिकिं ॥ दिहागअं ॥ क्वचित्केवलस्यापि ॥ दुहाविसोसुरवहूसत्थो ॥ वानिर्झरेना ॥ ९८ ॥ निर्झरशब्देनकारेणसहइतओकारोवाभवति ॥ ओज्झरो । निज्झरो ॥ हरी

क्वेईतश्राद्रवति ॥ कम्हारा ॥ पानीयादिष्वित् ॥ १०१ ॥ पानीयादिषुशब्देषुईतइद्भवति ॥ पाणिअं । अलिअं । जिअइ । जिअउ । विलिअं । करिसो । सिरिसो । दुइअं । तइअं । गहिरं । उवणिअं । आणिअं । पलिविअं । ओसिअंतं । पसिअ । गहिअं । वम्मिओ । तआणिं ॥ पानीय । अलीक । जीवति । जीवतु । व्रीडित । करीष । शिरीष । द्वितीय । तृतीय । गभीर । उपनीत । आनीत । प्रदीपित । अवसीदत् । प्रसीद । गृहीत । वल्मीक । तदानीं इतिपानीयादयः ॥ बहुलाधिकारादेषुक्वचिन्नित्यंक्वचिद्विकल्पः ॥ तेनपाणीअं अलीअं जीअइ करीसो उवणीओ इत्यादिसिद्धं ॥ उज्जीर्णे ॥ २ ॥ जीर्णशब्देईतउद्भवति ॥ जुण्णसुरा ॥ क्वचिन्नभवति ॥ जिण्णेभोअणमत्तेओ ॥ ऊहीनविहीनेवा ॥ ३ ॥ अनयोरीतऊत्वंवाभवति ॥ हूणो । हीणो ॥ विहीणो । विहूणो ॥ विहीनइतिकिं ॥ पहीणजरमरणा ॥ तीर्थेहे ॥ ४ ॥ तीर्थशब्देहेसतिईतऊत्वंभवति ॥ तूहं ॥ हेइतिकिं ॥ तित्थं ॥ एत्पीयूषापीडबिभीतककीद्दशेद्दशे ॥ ५ ॥ एष्वीतएत्वंभवति ॥ पेऊसं । आमेलो । बहेडओ । केरिसो । एरिसो ॥ नीडपीठेवा ॥ ॥ ६ ॥ अनयोरीतएत्वंवाभवति ॥ नेडं । नीडं ॥ पेढं । पीढं ॥ उतोमुकुलादिष्वत् ॥ ७ ॥ मुकुलइत्येवमादिषु

शब्देष्वादेरुतोऽत्वंभवति ॥ मउलं । मउलो । मउरं । मउडं । अगरुं । गरुई । जहिट्ठिलो । जहुट्ठिलो ॥ सोअमल्लं । गलोई ॥ मुकुल मुकुर मुकुट अगुरु गुर्वी युधिष्ठिर सौकुमार्य गुडूची इतिमुकुलादयः ॥ क्वचिदाकारोपि ॥ विद्युतः। विहाओ ॥ वोपरौ ॥ ८ ॥ उपरावुतोऽद्वाभवति ॥ अवरिं । उवरिं ॥ गुरौकेवा ॥ ९ ॥ गुरौस्वार्थेकेसतिआदे रुतोऽद्वाभवति ॥ गरुओ । गुरुओ ॥ कइतिकिं । गुरू ॥ इर्भ्रुकुटौ ॥ १० ॥ भ्रुकुटावादेरुतइर्भवति ॥ भिउडी ॥ पुरुषेरोः ॥ ११ ॥ पुरुषशब्देरोरुतइत्वंभवति ॥ पुरिसो । पउरिसं ॥ ईक्षुते ॥ १२ ॥ क्षुतशब्देआदेरुत ईत्वंभवति ॥ छीअं ॥ ऊत्सुन्नगमुसलेवा ॥ १३ ॥ अनयोरादेरुतऊद्वाभवति ॥ सूहवो । सुहओ ॥ मूसलं । मुसलं ॥ अनुत्साहोत्सन्नेत्सच्छे ॥ १४ ॥ उत्साहोत्सन्नवर्जितेशब्देयौत्सच्छौतयोःपरयोरादेरुतऊद्भवति ॥त्स॥ ऊसओ । ऊसवो ॥ ऊसित्तो । ऊसरइ ॥ छ ॥ उद्गताःशुकायस्मात्सः ऊसुओ । ऊससइ ॥ अनुत्साहोत्सन्नइतिकिं ॥ उच्छाहो । उत्सन्नो॥ लुकिदुरोवा ॥ १५ ॥ दुरउपसर्गस्यरेफलोपेसतिउतऊत्वंवाभवति ॥ दूसहो । दुसहो ॥ दू हवो । दुहवो ॥ लुकीतिकिं ॥ दुस्सहोविरहो ॥ ओत्संयोगे ॥ १६ ॥ संयोगेपरेआदेरुतओत्वंभवति ॥ तोण्डं ।

मोण्डं । पोक्खरं । कोट्टिमं । पोत्थओ । लोट्ठओ । मोत्था । मोग्गरो । पोग्गलं । कोण्ठो । कोन्तो । वोक्कंतं ॥ कुतूह लेवाऽहस्वश्च ॥ १७ ॥ कुतूहलशब्देउतओद्वाभवतितत्संनियोगेऽहस्वश्चवा ॥ कोउहलं । कुऊहलं । कोउहल्लम् ॥ अदूतः सूक्ष्मेवा ॥ १८ ॥ सूक्ष्मशब्देऊतोऽद्वाभवति ॥ सण्हम् । सुण्हं ॥ आर्षे । सुहुमं ॥ दुकूलेवालश्च द्विः ॥ १९ ॥ दुकूलशब्देऊकारस्यअत्वंवाभवति तत्संनियोगेचलकारोद्विर्भवति ॥ दुअल्लं । दुऊलं ॥ आर्षेदुगुल्लं ॥ ईर्वोद्यूढे ॥ १२० ॥ उह्यूढशब्देऊतईत्वंवाभवति ॥ उव्वीढं । उव्वूढं ॥ उर्भ्रूहनूमत्कंडूयवातूले ॥ २१ ॥ एषुऊतउत्वंभवति ॥ भुमया । हणुमन्तो । कंडुअइ । वाउलो ॥ मधूकेवा ॥ २२ ॥ मधूकशब्देऊतउद्वाभवति ॥ महुअं । महूअं ॥ इदेतौनूपुरेवा ॥ २३ ॥ नूपुरशब्देऊतइत्इत्येतौवाभवतः ॥ निउरं । नेउरं ॥ पक्षे नूपुरं ॥ ॥ ओत्कृष्मांडीतूणीरकूर्परस्थूलतांबूलगुडूचीमूल्ये ॥ २४ ॥ एषुऊतओद्भवति ॥ कोहण्डी । कोहली ॥ तो णीरं । कोप्परं । थोरं । तंबोलं । गलोई । मोल्लं ॥ स्थूणातूणेवा ॥२५॥ अनयोरूतओत्वंवाभवति ॥ थोणा । थू णा ॥ तोणं ।तूणं ॥ ऋतोऽत् ॥ २६ ॥ आदेर्ऋकारस्यात्वंभवति ॥ घृतं । घयं ॥ तृणं । तणं ॥ कृतं । कयं ॥ वृ

रिद्धा ॥३५॥ मातृशब्दस्यगौणस्यऋतइद्धाभवति॥ माइहरं। माउहरं ॥ क्वचिदगौणस्यापि॥ माईण ॥ उदूदो न्मृपि ॥३६॥ मृपाशब्देऋतउत्ऊत्ओच्चभवंति॥ मुसा। मूसा। मोसा॥ मुसावाओ। मूसावाओ। मोसावाओ॥ ॥इदुतौवृष्टवृष्टिपृथङ्मृदंगनप्तृके॥ ३७॥ एषुऋतइकारोकारौभवतः॥ विट्ठो। वुट्ठो ॥ विट्ठी। वुट्ठी॥ पिहं। पुहं॥ मिइंगो। मुइंगो॥ नत्तिओ। नत्तुओ ॥ वाबृहस्पतौ ॥ ३८॥ बृहस्पतौशब्देऋतइदुतौवाभवतः॥ बिहप्फई। वुहप्फई। पक्षे बहप्फई॥ इदेदोद्वंते ॥ ३९ ॥ वृंतशब्देऋतइत्एत्ओच्चभवंति॥ विण्टं। वेण्टं। वोण्टं॥ रिःकेवलस्य ॥४०॥ केवलस्यव्यंजनेनाऽसंपृक्तस्यऋतोरिरादेशोभवति॥ रिद्धी। रिच्छो ॥ऋणार्ज्वृषभर्त्वृषौवा॥४१॥ ऋणऋजुऋषभऋतुऋषिषुऋतोरिर्वाभवति॥ रिणं। अणं। रिजू। उजू॥ रिसहो। उसहो॥ रिऊ। उऊ॥ रिसी। इसी॥ ॥ दृशेःक्विप्टक्सकः ॥ ४२ ॥ क्विप्टक्सक्इत्येतदंतस्यदृशेर्धातोर्ऋतोरिरादेशोभवति ॥ सदृक्। सरिवण्णो। सरिरूवो। सरिबंदीएं। सदृशः। सरिसो ॥ सदृक्षः। सरिच्छो ॥ एवंएआरिसो। भवारिसो। जारिसो। तारिसो। केरिसो। एरिसो। अन्नादिसो। अम्हारिसो। तुम्हारिसो ॥ टक्सक्साहचर्यात्त्यदाद्यन्यादिसूत्रविहितःक्विबिहगृह्यते ॥

आहतेढिः ॥ ४३ ॥ आहतशब्देऋतोढिरादेशोभवति ॥ आढिओ ॥ अरिर्दृप्ते ॥ ४४ ॥ दृप्तशब्देऋतोऽरि रादेशोभवति ॥ दरिओ ॥दरिअसीहेण ॥ लृतइलिःक्लृप्तक्लृन्ने ॥ ४५ ॥ अनयोर्लृतइलिरादेशोभवति ॥ किलि न्नकुसुमोवअ्यारेसु ॥ धाराकिलिन्नवन्तं ॥ एतइद्वावेदनाचपेटादेवरकेसरे ॥ ४६ ॥ वेदनादिष्वेतइत्वंवाभव ति ॥ विअणा । वेअणा ॥ चविडा । विअड चवेडा विणोआ ॥ दिअरो । देवरो॥महमहिअदंसणकिसरं । केसरं ॥ महिला महेला इतितुमहिलमहेलाभ्यांसिद्धं ॥ ऊःस्तेनेवा ॥ ४७ ॥ स्तेनेएतऊद्वाभवति ॥ थूणो । थेणो ॥ ऐतएत् ॥ ४८ ॥ ऐकारस्यादौवर्त्तमानस्यएत्त्वंभवति ॥ सेला । सेन्नं । तेलुक्कं । एरावणो । केलासो । वेज्जो । केढवो । वेहवं ॥ इत्सैंधवशनैश्चरे ॥ ४९ ॥ एतयोरैतइत्वंभवति ॥ सिंधवं । सणिच्छरो ॥सैन्येवा ॥१५०॥ सैन्यशब्देएतइद्वाभवति ॥ सिन्नं । सेन्नं ॥ अइर्दैत्यादौच ॥ ५१ ॥ सैन्यशब्देदैत्यइत्येवमादिपुचऐतोअइइ त्यादेशोभवति ॥ एत्वापवादः ॥ सइन्नं । दइच्चो । दइन्नं । अइसरिअं । भइरवो । वइजवणो । दइवज्जं । वइआ लीअं । वइएरो । वइएहो । वइदब्भो । वइस्साणरो । कइअवं । वइसाहो । वइसालो । सइरं । चइत्तं ॥ दैत्य

दैन्य । ऐश्वर्य । भैरव । वैजयन । दैवत । वैतालीय । वैदेश । वैदेह । वैदर्भ । वैश्वानर । कैतव । वैशाख । वैशा ल । स्वैर । चैत्य इत्यादि ॥ विश्लेषेनभवति ॥ चैत्यं । चेइअं ॥ आर्षे । चैत्यवंदनं । चीवंदणं ॥ वैरादौवा ॥ ५२ ॥ वैरादिष्वैतोइरादेशोवाभवति ॥ वइरं । वेरं ॥ कइलासो । केलासो ॥ कइरवं । केरवं ॥ वइसवणो । वेसवणो ॥ व इसंपायणो । वेसंपायणो ॥ वइआलिओ । वेआलिओ ॥ वइसिअं । वेसिअं ॥ चइत्तो । चेत्तो ॥ वैर । कैलास । कैरव । वैश्रवण । वैशंपायन । वैतालिक । वैशिक । चैत्र इत्यादि ॥ एच्चदैवे ॥ ५३ ॥ दैवशब्देऐतएत्अइश्चा देशोभवति ॥ देव्वं । देवं ॥ दइव्वं । दइवं ॥ उच्चैर्नीचैरस्यञः ॥ ५४ ॥ अनयोरैतोअअइत्यादेशोभवति ॥ उच्च अं । नीचअं ॥ उच्चनीचाभ्यांकेपिसिद्धं ॥ उच्चैर्नीचैसोस्तुरूपांतरनिवृत्त्यर्थवचनं ॥ ईत्धैर्ये ॥ ५५ ॥ धैर्यशब्देऐत ईइभवति ॥ धीरंहरइविसाओ ॥ ओतोऽह्वान्योऽन्यत्रकोष्ठातोद्यशिरोवेदनामनोहरसरोरुहेक्तोश्चवः ॥ ५६ ॥ ॥ एष्वोतोऽत्वंवाभवति तत्संनियोगेचयथासंभवंककारतकारयोर्वाऽऽदेशः ॥ अन्नन्नं । अन्नुन्नं ॥ पवट्ठो । पउट्ठो ॥ आवज्जं । आउज्जं ॥ सिरविअणा । सिरोविअणा ॥ मणहरं । मणोहरं ॥ सररुहं । सरोरुहं ॥ ऊत्सोच्छ्वासे ॥ ५७ ॥

सोच्छ्वासेशब्देओतऊद्भवति ॥ सोच्छ्वासः । सूसासो ॥ गव्यउआअं ॥५८॥ गोशब्देअउआअइत्यादेशौभवतः॥ गउआ।गउआ । गाओ॥हरस्सएसागाई ॥ औतओत् ॥ ५९ ॥ औकारस्याऽऽदेरोद्भवति ॥कौमुदी । कोमुई ॥ यौवनं । जोव्वणं ॥ कौस्तुभः । कोत्थुहो ॥ कौशाम्बी । कोसंबी ॥ क्रौंचः।कोंचो ॥ कौशिकः । कोसिओ ॥ उत्सौंदर्यादौ ॥ १६० ॥ सौंदर्यादिपुशब्देषुओतउद्भवति ॥ सुंदेरं । सुंदरिअं ॥ मुंजायणो । सुंडो । सुद्धोअणी । दुवारिओ। सुगंधत्तणं । पुलोमी । सुवण्णिओ ॥ सौंदर्य । मौंजायन । शौण्ड । शौद्धोदनि । दौवारिक । सौगन्ध्य । पौलोमी । सौवर्णिक ॥ कौक्षेयकेवा ॥ ६१ ॥कौक्षेयकशब्देऔतउद्वाभवति॥कुच्छेअअं । कोच्छेअअं॥अउःपौरादौचा॥६२॥ कौक्षेयकेपौरादिपुचऔतअउरादेशोभवति ॥ कउच्छेअअं । पौरः । पउरो । पउरजणो ॥ कौरवः । कउरवो ॥कौशलं । कउसलं ॥ पौरुषं। पउरिसं ॥ सौधं । सउहं ॥ गौडः । गउडो ॥ मौलिः । मउली ॥ मौनं । मउणं ॥ सौराः । सउरा ॥ कौलाः । कउला ॥ आच्चगौरवे ॥ ६३ ॥ गौरवशब्देऔतआत्वंभवति॥गारवं । गउरवं ॥ नाव्यावः ॥ ६४ ॥ नौशब्देऔतआवादेशोभवति ॥ नावा ॥ एत्रयोदशादौस्वरस्यसस्वरव्यंजनेन ॥ ६५ ॥

त्रयोदशन्नित्येवंप्रकारेषुसंस्कृताशब्देष्वादेःस्वरस्यपरेणसस्वरव्यंजनेनसहएद्भवति ॥ तेरह । तेवीसा । तेतीसा ॥ ॥ स्थविरविचकिलायस्कारे ॥ ६६ ॥ एष्वादेःस्वरस्यपरेणसस्वरव्यंजनेनसहएद्भवति ॥ थेरो । वेइल्लं । मुद्धवि अइल्लपसूणपुंजाइत्यपिदृश्यते ॥ एक्कारो ॥ वाकदले ॥ ६७ ॥ कदलशब्देआदेःस्वरस्यपरेणसस्वरव्यंजनेनसह एद्वाभवति ॥ केलं । कञ्चलं ॥ केली । कञ्चली ॥ वेतःकर्णिकारे ॥ ६८ ॥ कर्णिकारेइतःसस्वरव्यंजनेनसहए द्वाभवति ॥ कणेरो । कण्णिआरो ॥ अयौवैत् ॥ ६९ ॥ अयिशब्देआदेःस्वरस्यपरेणसस्वरव्यंजनेनसहऐद्वाभव ति ॥ ऐबीहेमि । अइउम्मत्तिए ॥ वचनादैकारस्यापिप्राकृतेप्रयोगः ॥ ओत्पूतरबदरनवमालिकानवफलिकापू गफले ॥ १७० ॥ पूतरादिष्वादेःस्वरस्यपरेणसस्वरव्यंजनेनसहओद्भवति ॥ पोरो । बोरं । बोरी ॥ नोमालिआ। नोहलिआ ॥ पोप्फलं । पोप्फली ॥ नवामयूखलवणचतुर्गणचतुर्थचतुर्दशचतुर्वारसुकुमारकुतूहलोदूखलो ॥ लूखले ॥ ७१ ॥ मयूखादिष्वादेःस्वरस्यपरेणसस्वरव्यंजनेनसहओद्वाभवति ॥ मोहो । मऊहो ॥ लोणं । इअल वणुग्गमा ॥ चोग्गुणो । चउग्गुणो ॥ चोत्थो । चउत्थो ॥ चोत्थी । चउत्थी ॥ चोद्दह । चउद्दह ॥ चोद्दसी ।चउद्दसी॥

चोआरो । चउआरो ॥ सोमालो । सुउमालो ॥ कोहलं । कोउहलं॥तहमन्नेकोहलिए॥ओहलो । उऊहलो॥ओक्खलं । उलूहलं ॥ मोरोमऊरोइतितुमोरमयूरशब्दाभ्यांसिद्धं ॥ अवापोतेच ॥७२॥ अवापयोरुपसर्गयोरुतइतिविकल्पार्थ निपातेचआदेःस्वरस्यपरेणसस्वरव्यंजनेनसहओद्वाभवति॥ओअरइ। अवअरइ॥ओआसो।अवआसो॥ अप॥ ओसरइ।अवसरइ॥ओसारिअं । अवसारिअं ॥ उत ॥ ओवणं । उअवणं॥ ओघणो । उअघणो॥ क्वचिन्नभवति॥ अवगअं । अवसद्दो । उअरवी ॥ऊच्चोपे॥७३॥ उपशब्देआदेःस्वरस्यपरेणसस्वरव्यंजनेनसहऊत्ओच्चादेशौवा भवतः ॥ ऊहसिअं । ओहसिअं । उवहसिअं ॥ ऊज्झाहो । उज्झाओ । उवज्झाओ ॥ ऊआसो । ओआसो । उववा सो ॥ उमोनिपण्णे ॥७४॥ निपण्णशब्देआदेःस्वरस्यपरेणसस्वरव्यंजनेनसहउमआदेशोवाभवति ॥ णुमण्णो। णिसण्णो ॥ प्रावरणेअङ्गवाऊ ॥ ७५॥ प्रावरणशब्देआदेःस्वरस्यपरेणसस्वरव्यंजनेनसह अङ्गु आउ इत्ये तावादेशौवाभवतः ॥ पंगुरणं। पाउरणं। पावरणं ॥ स्वरादसंयुक्तस्यानादेः ॥ ७६ ॥ अधिकारोयम् ॥ यदित ऊर्ध्वमनुक्रमिष्यामस्तत्स्वरात्परस्यासंयुक्तस्यानादेर्भवतीतिवेदितव्यं ॥ कगचजतदपयवांप्रायोलुक् ॥ ७७॥

स्वरात्परेषामनादिभूतानामसंयुक्तानांकगचजतदपयवानांप्रायोलुग्भवति ॥क॥ तित्थअरो । लोअो । सअढं ॥ ग ॥ नअो । नअरं । मअंको॥च॥सई । कअग्गहो॥ज॥रअअं । पआवई । गओ॥त॥विआणं । रसाअलं । जई ॥द॥गआ । मअणो ॥प॥ रिऊ । सुउरिसो ॥य॥ दयालू । नअणं । विउओ ॥ व॥ लाअण्णं । विउहो । वलआणलो॥ प्रायोग्रहणा त्कचिन्नभवति॥सुकुसुमं । पआगजलं । सुगओ । अगरू । सचावं । विजणं । सुतारं । विदुरो।सपावं।समवाओ । देवो। दाणवो॥ स्वरादित्येव ॥ संकरो। संगमो । नत्तंचरो । धणंजओ । विसंतवो। पुरंदरो । संवुडो । संवरो ॥ असंयुक्तस्येत्ये व ॥ अक्को । वग्गो । अच्चो । वज्जं । धुत्तो । उद्दामो । कज्जं । सव्वं ॥ क्वचित्संयुक्तस्यापि॥ नक्तंचरः । नक्कंचरो ॥ अनादेरि त्येव ॥ कालो । गंधो । चोरो । जारो । तरू । दवो । पावं। वण्णो ॥ यकारस्यतुजत्वमादौवक्ष्यते ॥ समासेतुवाक्यविभ क्त्यपेक्षयाभिन्नपदत्वमपिविवक्ष्यते । तेनतत्रयथादर्शनमुभयमपिभवति। सुहंकरो । सुहच्चरो॥आगमिओ।आच्चमि ॥ ओ॥जलचरो । जलच्चरो ॥ बहुतरो । बहुच्चरो ॥सुहदो। सुहओ इत्यादि॥क्वचिदादेरपि॥सपुनः। सउणो॥सच । सोअ॥ चिन्हं।इन्धो।क्वचिच्चस्यजः॥ पिशाची । पिसाजी। एगत्तं। एक । एगो ॥ अमुकः । अमुगो॥श्रावकः । सावगो ॥ आकारः।

आगारो ॥ तीर्थकरः । तित्थगरो ॥ आकर्षः । आगरिसो ॥ लोगस्सुज्जोअगराइत्यादिषुतुव्यत्ययश्चेत्येव कस्यगत्वं ॥ आर्षेअन्यदपिदृश्यते ॥ आकुंचनं । आउंटणं । अत्रचस्यटत्वं ॥ यमुनाचामुंडाकामुकाऽतिमुक्तकेमोऽनुनासिकश्च ॥७८॥ एषुमस्यलुग्भवति लुकिचसतिमस्यस्थानेअनुनासिकोभवति ॥ जउँणा । चाउँडा । काउँओ । अणिउँतअं ॥ क्वचिन्नभवति ॥ अइमुंतअं । अइमुत्तअं ॥नावर्णात्पः ॥७९॥ अवर्णात्परस्यानादेःपस्यलुग्नभवति॥सवहो । सावो ॥ अनादेरित्येव । परओट्ठो ॥ अवर्णोयश्रुतिः ॥ १८० ॥ कगचजेत्यादिनालुकिसतिशेषोऽवर्णोऽवर्णात्परोलघुप्रयत्नतरयकारश्रुतिर्भवति॥तित्थअरो । सअढं । नअरं। मअंको ।कअग्गहो।काअमणी। रअअं।पअावई। रसाअलं । पाआलं । मअणो । गआ । नअणं । दआलू । लाअण्णं॥अवर्णइतिकिं॥सउणो । पउणो । पउरं । राईवं। निहओ । निनओ । वाऊ । कई॥अवर्णादित्येव ॥ लोअस्स । देअरो ॥ क्वचिद्भवति।पिअइ॥कुब्जकर्परकीलकेकःखोऽपुष्पे ॥ ८१ ॥ एषुकस्यखोभवति पुष्पंचेत्कुब्जाभिधेयंनभवति ॥ खुज्जो । खप्परं । खीलओ ॥ अपुष्पइतिकिं ॥ बंधेउंकुज्जअप्पसूणं ॥ आर्षेऽन्यत्रापि । कासितं । खासितं । कसितं । खसिअं॥ मरकतमदकलेगःकंदुकेत्वा

दें: ॥८२॥ अनयोःकस्यगोभवति कंदुकेत्वाद्यस्य॥ मरगअं। मअगलो। गेंदुअं॥किरातेचः॥८३॥ किरातेकस्य चोभवति॥ चिलाओ। पुलिंदएवायंविधिः॥ कामरूपिणितुनेष्यते॥ नमिमोहरकिराअं॥ शीकरेभहौवा॥८४॥ शीकरेभहौवाभवतः॥ सीहरो। सीभरो॥ पक्षेसीअरो॥ चंद्रिकायांमः॥ ८५॥ चंद्रिकाशब्देकस्यमोभवति॥ चंदिमा॥ निकषस्फटिकचिकुरेहः॥ ८६॥ एषुकस्यहोभवति॥ निहसो। फलिहो। चिहुरो॥ चिहुरशब्दः संस्कृतेपिइतिदुर्गः॥ खघथधभां॥ ८७॥ स्वरात्परेषामसंयुक्तानामनादिभूतानांखघथधभांइत्येतेषांवर्णानां प्रायोहोभवति॥ ख। साहा। मुहं। मेहला। लिहइ॥ घ॥ मोहो। जहणं। माहो। लाहइ॥ थ॥ नाहो। आव सहो। मिहुणं। कहइ॥ ध॥ साहू। वाहो। बहिरो। बाहइ। इंदहणू॥ भ॥ सहा। सहावो। नहं। थणहरो। सो हइ॥ स्वरादित्येव॥ संखो। संघो। कंथा। बंधो। खंभो॥ असंयुक्तस्येत्येव॥ अक्खइ। अग्घइ। कत्थइ। सिद्ध ओ। बंधइ। लुब्भइ॥ अनादेरित्येव॥ गज्जंतेखेमेहा फुल्लानीवापणत्थिरामोरा। नट्ठोचंदुजोउ। वासारत्तो॥ ह लापत्तो। गच्छइघणो॥ प्रायइत्येव॥ सरिसवखलो। पलयघणो। अत्थिरो। जिणधम्मो। पणट्ठभओ। नभं॥ एथकि

धोवा ॥८८॥ पृथक्शब्देथस्यधोवाभवति ॥ पिधं । पुधं ॥ पिहं । पुहं ॥ शृङ्खलेखःकः ॥ ८९ ॥ शृंखलेखस्य कोभवति ॥ संकलं ॥ पुन्नागभागिन्योर्गोमः॥ ९० ॥ अनयोर्गस्यमोभवति ॥ पुन्नामाइंवसंते । भामिणी ॥छा गेलः ॥ ९१ ॥ छागेगस्यलोभवति ॥ छालो । छाली ॥ ऊत्वेदुर्भगसुभगेवः ॥९२॥ अनयोरूत्वेगस्यवोभवति॥ दूहवो । सूहवो ॥ ऊत्वइतिकिं ॥ दुहओ । सुहओ ॥ खचितपिशाचयोश्चःसल्लौवा ॥ ९३ ॥ अनयोश्चस्ययथासं ख्यं स ल्ल इत्यादेशौवाभवतः॥खसिओ । खइओ ॥ पिसल्लो । पिसाओ ॥ जटिलेजोझोवा ॥ ९४ ॥ जटिलेज स्यझोवाभवति ॥ झडिलो । जडिलो ॥ टोडः ॥ ९५ ॥ स्वरात्परस्यासंयुक्तस्यानादेष्टस्यडोभवति ॥ नडो । भ डो । घडो । घडइ ॥ स्वरादित्येव ॥ घंटा ॥ असंयुक्तस्येत्येव ॥ खट्वा ॥ अनादेरित्येव ॥ टक्को ॥ क्वचिन्नभवति ॥ अ टति । अटइ ॥ सटाशकटकैटभेढः ॥९६ ॥ एषुटस्यढोभवति ॥ सढा । सच्चढो । केढवो ॥स्फटिकेलः॥९७॥ स्फटिकेटस्यलोभवति ॥ फलिहो ॥ चपेटापाटौवा ॥ ९८ ॥ चपेटाशब्देण्यंतेपाटौधातौटस्यलोवाभवति ॥ च विला । चविडा । फालइ । फाडेइ ॥ ठोढः ॥ ९९ ॥ स्वरात्परस्यासंयुक्तस्यानादेष्ठस्यढोभवति ॥ मढो । सढो ।

ओ। हरडई। मडच्चं॥ आर्षे॥ दुष्कृतं। दुक्कडं॥ सुकृतं। सुकडं॥ आत्तृतं। आहडं॥ अवत्तृतं। अवहडं इत्या
दि॥ प्रायइत्येव॥ प्रतिसमयं। पइसमयं॥ प्रतीपं। पईवं॥ संप्रति। संपइ॥ प्रतिष्ठानं। पइट्ठाणं। प्रतिष्ठा। पइ
ट्ठा॥ प्रतिज्ञा। पइण्णा॥ प्रति। प्रभृति। प्राभृत। व्यापृत। पताका। बिभीतक। हरीतकी। मृतक इत्यादि॥
इत्वेवेतसे॥ ७॥ वेतसेतस्यडोभवति इत्वेसति॥ वेडिसो॥ इत्वइतिकिं॥ वेअसो॥ इःस्वप्नादावितीकारोवि
कल्पेनभवति इत्त्वव्यावृत्तिबलात्॥ गर्भितातिमुक्तकेणः॥ ८॥ अनयोस्तस्यणोभवति॥ गब्भिणो। अणि
उँतच्चं॥ क्वचिन्नभवत्यपि॥ अइमुत्तच्चं॥ कथमेरावणो ऐरावणशब्दस्य॥ एरावओइतितुऐरावतस्य॥ रुदिते
दिनाण्णः॥ ९॥ रुदितेदिनासहतस्यद्विरुक्तोणोभवति॥ रुण्णं॥ अत्रकेचिदृत्वादिषुदइत्यारब्धवंतः सतु शौ
रसेनीमागधीविषयएवदृश्यतेइतिनोच्यते॥ प्राकृतेहि। ऋतुः। रिऊ। उऊ॥ रजतं। रय्यच्चं॥ एतद्। एअं॥ गतः।
गओ॥ आगतः। आगओ॥ सांप्रतं। संपच्चं॥ यतः। जओ॥ ततः। तओ॥ कृतं। कयं॥ त्तृतं। हयं॥ हताशः।
हआसो॥ श्रुतः। सुओ॥ आकृतिः। आकिई॥ निर्वृतः। निव्वुओ॥ तातः। ताओ॥ कतरः। कयरो॥ द्वितीयः।

दुईओ इत्यादयःप्रयोगाभवंति॥ नपुनः रुदूरञ्चदमित्यादि ॥ क्वचित्भावेपिण्यत्ययश्चेत्येवसिद्धं ॥ दिहीइत्येतदर्थंतुधृतेर्दिहिरितिवक्ष्यामः ॥ सप्ततौरः ॥ २१० ॥ सप्ततौतस्यरोभवति ॥ सत्तरी ॥ अतसीसातवाहनेलः ॥ ११ ॥ अनयोस्तस्यलोभवति ॥ अलसी । सालाहणो । सालवाहणो । सालाहणीभासा ॥ पलितेवा ॥ १२ ॥ पलितेतस्यलोवाभवति ॥ पलिलं । पलिअं ॥ पीतेवोलेवा ॥ १३ ॥ पीतेतस्यवोवाभवति स्वार्थेलकारेपरे ॥ पीवलं । पीअलं ॥ लइतिकिं ॥ पीअं ॥ वितस्तिवसतिभरतकातरमातुलिंगेहः ॥१४॥ एषुतस्यहोभवति ॥ विहत्थी । वसही ॥ बहुलाधिकारात्क्वचिन्नभवति॥ वसई । भरहो । काहलो । माहुलिंगं । मातुलुंगशब्दस्यतुमाउलुंगं ॥ मेथिशिथिरश्रिथिलप्रथमेथस्यढः ॥ १५ ॥ एषुथस्यढोभवति ॥ हापवादः ॥ मेढी । सिढिलो । सिढिलो । पढमो ॥ निशीथपृथिव्योर्वा ॥ १६ ॥ अनयोस्थस्यढोभवतिवा ॥ निसीढो । निसीहो । पुढवी । पुहवी ॥ दशनदष्टदग्धदोलादण्डदरदाहदम्भदर्भकदनदोहदेदोवाडः ॥ १७॥ एषुदस्यडोवाभवति ॥ डसणं । दसणं॥डट्ठो । दट्ठो ।डक्को । डड्ढो । दड्ढो॥डोला । दोला॥डंडो । दण्डो॥डरो । दरो ॥ डाहो । दाहो॥डंभो । दंभो ॥

ड्व्भो । दव्भो ॥ कडणं । कञ्चणं ॥ डोहलो । दोहलो ॥ दरशब्दस्यचभयार्थवृत्तेरेवभवति ॥ अन्यत्र दरदलिअं ॥ दंशदहोः ॥ १८ ॥ अनयोर्धात्वोर्दस्यडोभवति ॥ डंसइ । डहइ ॥ संख्यागद्गदेरः ॥ १९ ॥ संख्यावाचिनि गद्गदशब्देचदस्यरोभवति ॥ एआरह । बारह । तेरह । गग्गरं ॥ अनादेरित्येव ॥ तेदस ॥ असंयुक्तस्येत्येव ॥ चउद्द ह ॥ कदल्यामद्रुमे ॥ २२० ॥ कदलीशब्देअद्रुमवाचिनिदस्यरोभवति ॥ करली ॥ अद्रुमइतिकिं ॥ कञ्चली। केली ॥ प्रदीपिदोहदेलः ॥ २१ ॥ प्रपूर्वेदीप्यतौधातौदोहदशब्देचदस्यलोभवति ॥ पलोवेइ । पलित्तं । दोह लो ॥ कदंबेवा २२ ॥ कदंबशब्देदस्यलोवाभवति ॥ कलम्बो । कञ्चम्बो ॥ दीपौधोवा ॥ २३ ॥ दीप्यतौद स्यधोवाभवति ॥ धिप्पइ । दिप्पइ ॥ कदर्थितेवः॥ २४ ॥ कदर्थितेदस्यवोभवति ॥ कवट्टिओ ॥ ककुदेहः॥२५॥ ककुदेदस्यहोभवति ॥ कउहं ॥ निषधेधोढः २६ ॥ निषधेधस्यढोभवति ॥ निसढो ॥ वौषधे ॥ २७ ॥ ओषधेध स्यहोभवतिवा ॥ ओसहं । ओसढं ॥ नोणः ॥२८॥ स्वरात्परस्यासंयुक्तस्यानादेर्नस्यणोभवति ॥ कणञ्जं। मञ्ज णो। वञ्चणं। नञ्चणं। माणइ ॥ आर्षे। आरनालंअनिलोइत्याद्यपि ॥ वादौ ॥ २९ ॥ असंयुक्तस्यादौवर्तमान

स्यनस्यणोवाभवति ॥ णरो । नरो ॥ णई । नई ॥ णेइ । नेइ॥ असंयुक्तस्येत्येव ॥ न्यायः । नाओ ॥ निम्बनापितेल ण्हंवा ॥ २३० ॥ अनयोर्नस्य ल ण्ह इत्येतौवाभवतः ॥ लिम्बो । निम्बो॥ण्हाविओ । नाविओ ॥ पोवः ॥३१ ॥ स्वरात्परस्यासंयुक्तस्याऽनादेःपरस्यप्रायोवोभवति॥सवहो । सावो । उवसग्गो । पईवो । कासवो । पावं । उवमा । क विलं । कुणवं । कलावो । कवालं । महिवालो । गोवइ । तवइ ॥ स्वरादित्येव ॥ कम्पइ ॥असंयुक्तस्येत्येव॥अप्पमत्तो॥ अनादेरित्येव ॥ सुहेणपढइ ॥ प्रायइत्येव ॥ कई । रिऊ ॥ एतेनपकारस्यप्राप्तयोर्लोपवकारयोर्यस्मिन्कृतेश्रुतिसुख मुत्पद्यतेसतत्रकार्यः ॥ पाटिपरुपपरिघपरिखापनसपारिभद्रेफः ॥ ३२ ॥ ण्यंतेपटिधातौपरुषादिषुचपस्य फोभवति॥ फालेइ । फाडेइ । फरुसो । फलिहो । फलिहा । फणसो । फालिहद्दो ॥ प्रभूतेवः ॥ ३३ ॥ प्रभूतेपस्यवो भवति ॥ वहुत्तं ॥ नीपार्पीडेमोवा ॥ ३४ ॥ अनयोःपस्यमोवाभवति॥नीमो । नीवो ॥ आमेलो । आवेडो॥पाप ॥ द्धौरः ॥ ३५ ॥ पापर्धावपदादौपकारस्यरोभवति ॥ पारद्धी ॥ फोभहौ ॥ ३६ ॥ स्वरात्परस्यासंयुक्तस्यानादेःफ स्यभहौभवतः ॥ क्वचित्भः ॥ रेफः । रेभो ॥ सिफा । सिभा ॥ क्वचित्तुहः ॥ मुत्ताहलं ॥ क्वचिदुभावपि ॥ सभलं । स

युष्मच्छब्देऽर्थपरेयस्यतोभवति ॥ तुम्हारिसो । तुम्हकेरो ॥ अर्थपरइतिकिं ॥ जुम्हदम्हपञ्चरणं ॥यष्ट्यांलः॥४७॥ यष्ट्यांयस्यलोभवति ॥ लट्ठी । वेणुलट्ठी । उच्छलट्ठी । महुलट्ठी ॥ वोत्तरीयानीयतीयकृद्येज्ञः ॥ ४८ ॥ उत्तरीय शब्देअनीयतीयकृद्यप्रत्ययेपुचयस्यद्विरुक्तोजोवाभवति॥उत्तरिज्जं । उत्तरीअं। अनीय । करणिज्जं । करणीअं।विम्ह णिज्जं । विम्हअणीअं ॥ जवणिज्जं । जवणीअं ॥ तीय । विइज्जो । बीओ ॥ कृद्य । पेज्जा । पेआ ॥ छायायांहोऽ कांतौवा ॥ ४९ ॥ अकांतौवर्तमानेछायाशब्देयस्यहोवाभवति ॥ वच्छस्सछाया । वच्छस्सछाहा आतपाभावः ॥ सच्छाहं । सच्छायं ॥ अकांतावितिकिं॥ मुहच्छाया । कांतिरित्यर्थः ॥ डाहवौकतिपये ॥ ५० ॥ कतिपयेयस्य डाह व इत्येतौपर्यायेणभवतः ॥ कइवाहं । कइअवं॥ किरिभेरेरोडः ॥ ५१ ॥ अनयोरस्यडोवाभवति ॥ किडी। भेडो ॥ पर्याणेडावा ॥ ५२ ॥ पर्याणेरस्यडाइत्यादेशोभवतिवा ॥ पडायाणं । पल्लाणं ॥ करवीरेणः॥ ५३ ॥ करवीरेप्रथमस्यरस्यणोभवति ॥ कणवीरो ॥ हरिद्रादौलः ॥ ५४ ॥ हरिद्रादिषुशब्देषुअसंयुक्तस्यरस्यलोभव ति ॥ हलिद्दी । दलिद्दाइ ॥ दलिद्दो । दालिदं । हलिद्दो । जहुट्ठिलो । सिढिलो । मुहलो । चलणो । बलुणो । कलु

णो । इंगालो । सक्कालो । सोमालो । चिलाओ । फलिहा । फलिहो । फालिहद्दो । काहलो । लुक्को । अवद्दालं । भसलो । जढलं । बढलो । निट्ठुलो ॥ बहुलाधिकाराच्चरणशब्दस्यपादार्थवृत्तेरेव ॥ अन्यत्रचरणकरणं ॥ भ्रमरेसस न्नियोगएव ॥ अन्यत्र भमरो ॥ तथा । जठरं । बठरो । निट्ठुरो इत्याद्यपि ॥ हरिद्रा । दरिद्राति । दरिद्र । दारिद्र्य । हरिद्र । युधिष्ठिर । शिथिर । मुखर । चरण । वरुण । करुण । अंगार । सत्कार । सुकुमार । किरात । परिखा । प रिघ । पारिभद्र । कातर । रुग्ण । अपद्वार । भ्रमर । जठर । बठर । निष्ठुर इत्यादि ॥ आर्षेदुवालसंगेइत्याद्यपि ॥ स्थूलेलोरः ॥ ५५ ॥ स्थूलेलस्यरोभवति ॥ थोरं ॥ कथंथूलभद्दो । थूरस्यहरिद्रादिलत्वेभविष्यति ॥ लाहललां गललांगूलेवाऽदेर्णः ॥ ५६ ॥ एष्वादेर्लस्यणोभवतिवा ॥ णाहलो । लाहलो ॥ णंगलं । लंगलं ॥ णंगूलं । लं गूलं ॥ ललाटेच ॥ ५७ ॥ ललाटेचादेर्लस्यणोभवति ॥ चकारआदेरनुवृत्त्यर्थः ॥ णिडालं । णडालं ॥ शबरे बोमः ॥ ५८ ॥ शबरेबस्यमोभवति ॥ समरो ॥ स्वप्ननीव्योर्वा ॥ ५९ ॥ अनयोर्वस्यमोवाभवति ॥ सिमि णो । सिविणो ॥ नीमी । नीवी ॥ शषोःसः ॥२६०॥ शकारषकारयोःसोभवति ॥ श ॥ सद्दो । कुसो । निसंसो ।

युष्मच्छब्देऽर्थपरेयस्यतोभवति ॥ तुम्हारिसो । तुम्हकेरो ॥ अर्थपरइतिकिं ॥ जुम्हदम्हपञ्चरणं ॥ यष्ट्यांलः ॥ ४७ ॥ यष्ट्यांयस्यलोभवति ॥ लट्ठी । वेणुलट्ठी । उच्छलट्ठी । महुलट्ठी ॥ वोत्तरीयानीयतीयकृद्येज्जः ॥ ४८ ॥ उत्तरीय शब्देअनीयतीयकृद्यप्रत्ययेपुचयस्यद्विरुक्तोजोवाभवति ॥ उत्तरिज्जं । उत्तरीअं । अनीय । करणिज्जं । करणीअं । विम्ह णिज्जं । विम्हअणीअं ॥ जवणिज्जं । जवणीअं ॥ तीय । विइज्जो । बीओ ॥ कृद्य । पेज्जा । पेआ ॥ छायायांहोऽ कांतौवा ॥ ४९ ॥ अकांतौवर्तमानेछायाशब्देयस्यहोवाभवति ॥ वच्छस्सछाया । वच्छस्सछाहा आतपाभावः ॥ सच्छाहं । सच्छायं ॥ अकांतावितिकिं ॥ मुहच्छाया । कांतिरित्यर्थः ॥ डाहवौकतिपये ॥ ५० ॥ कतिपयेयस्य डाह व इत्येतौपर्यायेणभवतः ॥ कइवाहं । कइअवं ॥ किरिभेरेरोडः ॥ ५१ ॥ अनयोरस्यडोवाभवति ॥ किडी । भेडो ॥ पर्याणेडावा ॥ ५२ ॥ पर्याणेरस्यडाइत्यादेशोभवतिवा ॥ पडायाणं । पल्लाणं ॥ करवीरेणः ॥ ५३ ॥ करवीरेप्रथमस्यरस्यणोभवति ॥ कणवीरो ॥ हरिद्रादौलः ॥ ५४ ॥ हरिद्रादिषुशब्देषुअसंयुक्तस्यरस्यलोभव ति ॥ दलिद्दी । दलिद्दाइ ॥ दलिद्दो । दालिदं । हलिद्दो । जहुट्ठिलो । सिढिलो । मुहलो । चलणो । बलुणो । कलु

कालायसत्दयेयः ॥ ६९ ॥ एषुसस्वरस्ययकारस्यलुग्वाभवति ॥ किसलं । किसलञ्जं ॥ कालासं । कालाञ्जसं ॥ म
हण्णवसमासहिआ । जालातेसहिअएहिंघिप्पंति । निसमणुप्पिअहिअस्सहिअञ्जं ॥ दुर्गादेव्युदुम्बरपादपतन
पादपीठेन्तर्दः ॥ २७० ॥ एषुसस्वरस्यदकारस्यांतर्मध्येवर्तमानस्यलुग्वाभवति ॥ दुग्गावी । दुग्गाएवी ॥ उंबरो ।
उउंबरो ॥ पावडणं । पाञ्जवडणं ॥ पावीढं । पाञ्जवीढं ॥ अंतरितिकिं ॥ दुर्गादेव्यामादौमाभूत् ॥ यावत्तावज्जीवि
तावर्त्तमानावटप्रावारकदेवकुलैवमेवेवः ॥ २७१ ॥ यावदादिषुसस्वरस्यवकारस्यांतर्वर्तमानस्यलुग्वाभवति॥
जा । जाव ॥ ता । ताव ॥ जीअं । जीविअं ॥ अत्तमाणो । आवत्तमाणो ॥ अडो । अवडो ॥ पारओ । पावारओ ॥
देउलं । देवउलं ॥ एमेव । एवमेव ॥ अंतरित्येव ॥ एवमेवेत्यस्यनभवति ॥ ॥ इत्याचार्यश्रीहेमचंद्रविरचितायां
सिद्धहेमचंद्राभिधानस्वोपज्ञशब्दानुशासनवृत्तौअष्टमाध्यायस्यप्रथमःपादः ॥ १ ॥ यद्दोर्मण्डलकुंडलीकृत
धनुर्दण्डेनसिंहाधिपक्रीतंवैरिकुलात्त्वयाकिलदलत्कुंदावदातंयशः ॥ भ्रांत्त्वात्रीणिजगंतिखेदविवशंतन्मालवीनांन्य
धादापांडौस्तनमण्डलेचधवलेगण्डस्थलेऽवस्थितं ॥ १ ॥ संयुक्तस्य ॥ १ ॥ अधिकारोयं ज्यायामीदितियावत्॥

यदितऊर्ध्वमनुक्रमिष्यामस्तत्संयुक्तस्येतिवेदितव्यं ॥ शक्तमुक्तदष्टरुग्णमृदुत्वेकोवा ॥ २ ॥ एषुसंयुक्तस्यकोवा भवति ॥ सक्को । सक्तो ॥ मुक्को । मुत्तो ॥ डक्को । दट्ठो ॥ लुक्को । लुग्गो । माउक्कं । माउत्तणं ॥ क्षःखःक्वचित्तुछडौ ॥ ३ ॥ क्षस्यखोभवतिक्वचित्तुछडावपि ॥ खञ्जो । लक्खणं ॥ क्वचित्तुछडावपि ॥ खीणं । छीणं । डीणं । डिज्झइ ॥ ष्कस्कयोर्नाम्नि ॥ ४ ॥ अनयोर्नाम्निसंज्ञायांखोभवति ॥ ष्क ॥ पोक्खरं । पोक्खरिणी ॥ निक्खं ॥ स्क ॥ खंधो । खंधावारो । अवक्खंदो ॥ नाम्नीतिकिं ॥ दुक्करं । निक्कंपं । निक्कओ । नमोक्कारो । सक्कञ्चं । सक्कारो । तक्करो ॥ शुष्कस्कंदेवा॥५॥ अनयोःष्कस्कयोःखोवाभवति॥सुक्खं। सुक्कं ॥ खंदो।कंदो॥श्वेटकादौ॥६॥ श्वेटकादिषुसंयुक्तस्यखोभवति ॥ खेडओ॥ श्वेटशब्दोविषपर्यायः॥ श्वोटकः। खोडओ॥ स्फोटकः। खोडओ ॥ स्फेटकः। खेडओ॥स्फेटिकः। खेडिओ॥स्थाणावहरे ॥ ७ ॥ स्थाणौसंयुक्तस्यखोभवति हरश्चेद्वाच्योनभवति ॥ खाणू ॥ अहरइतिकिं ॥ थाणुणोरेहा ॥ स्तम्भेस्तोवा ॥ ८ ॥ स्तम्भशब्देस्तस्यखोवाभवति ॥ खम्भो । थम्भो काष्ठादिमयः ॥ थठाव स्पंदे ॥ ९ ॥ स्पन्दाभाववृत्तौस्तम्भेस्तस्यथठौभवतः ॥ थंभो । ठंभो ॥ स्तभ्यते । थंभिज्जइ । ठंभिज्जइ॥रक्ते

गोवा ॥ १० ॥ रक्तशब्देसंयुक्तस्यगोवाभवति ॥ रग्गो । रत्तो ॥ शुक्लेड्डोवा ॥ ११ ॥ शुक्लशब्देसंयुक्तस्यड्डो वाभवति ॥ सुड्डं । सुक्कं ॥ कृत्तिचत्वरेचः १२ ॥ अनयोःसंयुक्तस्यचोभवति ॥ किच्ची । चच्चरं ॥त्योऽचैत्ये॥१३॥ चैत्यवर्जितेत्यस्यचोभवति ॥ सच्चं ।पच्चओ ॥ अचैत्यइतिकिं ॥ चइत्तं ॥ प्रत्यूषेषश्चहोवा ॥ १४ ॥ प्रत्यूषेत्यस्य चोभवति तत्सन्नियोगेचषस्यहोवाभवति ॥ पच्हूहो । पच्हूसो ॥ त्वथ्वद्वध्वांचछजझाःक्वचित् ॥ १५ ॥ एषांयथा संख्यमेतेक्वचित्भवंति ॥ भुक्त्वा । भोच्चा ॥ ज्ञात्त्वा । णच्चा ॥ श्रुत्त्वा । सोच्चा ॥ पृथ्वी । पिच्छी ॥ विद्वान् । विज्जो॥ बुध्वा । बुज्झा ॥ भोच्चासञ्चलंपिच्छि विज्जंबुज्झाञ्चणण्णयग्गामि ॥ चइऊणतवंकाउंसंतीपत्तोसिवंपरमं ॥ वृश्चिकेश्वेञ्चुर्वा ॥ १६ ॥ वृश्चिकेश्वेःसस्वरस्यस्थानेञ्चुरादेशोभवति ॥ छापवादः ॥ विञ्चुओ ॥ विंचुवो ॥ पक्षे विंछिओ ॥ छोऽक्ष्यादौ ॥ १७ ॥ अक्ष्यादिषुसंयुक्तस्यछोभवति ॥ खस्यापवादः॥ अच्छि । उच्छू । लच्छी । क च्छो । छीअं । छीरं । सरिच्छो । वच्छो । मच्छिआ । छेत्तं। छुहा । दच्छो । कुच्छी । वच्छं । छुण्णो । कच्छा । छारो । कु च्छेअअं । छुरो । उच्छा । छअं । सारिच्छं ॥ अक्षि । इक्षु । लक्ष्मी । कक्ष । क्षुत । क्षीर । सदृक्ष । वृक्ष । मक्षिका । श्ये

त्तणं । संवत्तणं । आवत्तओ । निवत्तओ । पवत्तओ । संवत्तओ । वत्तिआ । वत्तिओ । कत्तिओ । उक्कत्तिओ । क
त्तरी । मुत्ती । मुत्तो । मुहुत्तो ॥ बहुलाधिकारात् वट्टा ॥ धूर्ति । कीर्ति । वार्ता । आवर्तन । निवर्तन । प्रवर्तन । सं
वर्तन । आवर्तक । निवर्तक । प्रवर्तक । संवर्तक । वार्तिक । वार्तिक । कार्तिक । उत्कीर्तित ॥ कर्तरी । मूर्ति । मूर्त ।
मुहूर्त इत्यादि ॥ वृन्तेण्टः ॥ ३१ ॥ वृन्तेण्टोभवति ॥ वेण्टं । तालवेण्टं ॥ ठोऽस्थिविसंस्थुले ॥ ३२ ॥ अन
योःसंयुक्तस्यठोभवति ॥ अट्ठी । विसंठुलं ॥ स्त्यानचतुर्थार्थेवा ॥ ३३ ॥ एषुसंयुक्तस्यठोवाभवति ॥ ठीणं । थी
णं । चउट्ठो । अट्ठोप्रयोजनं ॥ अत्थोधनं ॥ ष्टस्यानुष्ट्रेष्टासंदष्टे ॥ ३४ ॥ उष्ट्रादिवर्जितेष्टस्यठोभवति ॥ लट्ठी ।
मुट्ठी । दिट्ठी । सिट्ठी । पुट्ठो । कट्ठं । सुरट्ठा । इट्ठो । अणिट्ठं ॥ अनुष्ट्रेष्टासंदष्टइतिकिं ॥ उट्टो । इट्टा । चुण्णसंदट्ठो ॥
गर्तेडः ॥ ३५ ॥ गर्तशब्देसंयुक्तस्यडोभवति ॥ टापवादः ॥ गड्डो । गड्डा ॥ सम्मर्दवितर्दिविछर्दछर्दिकपर्दम ॥
र्दितेर्दस्य ॥ ३६ ॥ एषुर्दस्यडोभवति ॥ सम्मड्डो । विअड्डी । विछड्डो । छड्डी । कवड्डो । मड्डिओ । सम्मड्डिओ ॥
र्दिभेवा ॥ ३७ ॥ गर्दभेर्दस्यडोवाभवति ॥ गड्डहो । गद्दहो ॥ कंदरिकाभिंदिपालेण्डः ॥ ३८ ॥ अनयोःसंयुक्त

स्यण्डोभवति ॥ कण्डलिआ । भिण्डिवालो ॥ स्तब्धेठढौ ॥ ३९ ॥ स्तब्धेसंयुक्तयोर्यथाक्रमंठढौभवतः ॥ ठड्ढो ॥ दग्धविदग्धवृद्धिवृद्धेढः ॥ ४० ॥ एषुसंयुक्तस्यढोभवति ॥ दड्ढो । विअड्ढो । वुड्ढी । वुड्ढो ॥ क्वचिन्नभवति ॥ विद्धकइनिरूविअं ॥ श्रद्धर्धिमूर्धाऽर्धैऽतेवा ॥ ४१ ॥ एष्वंतेवर्तमानस्यसंयुक्तस्यढोभवतिवा ॥ सड्ढा । सद्धा ॥ इड्ढी । रिद्धी ॥ मुंढा । मुद्धा ॥ अड्ढं । अद्धं ॥ म्नज्ञोर्णः ॥ ४२ ॥ अनयोर्णोभवति ॥ म्न ॥ निण्णं । पज्जुण्णो ॥ज्ञ॥ णाणं । सण्णा । पण्णा । विण्णाणं ॥ पंचाशत्पंचदशदत्ते ॥ ४३ ॥ एषुसंयुक्तस्यणोभवति ॥ पण्णासा । पण्णरह । दिण्णं॥मन्योन्तोवा॥४४॥ मन्युशब्देसंयुक्तस्यन्तोवाभवति ॥ मन्तू । मन्नू॥स्तस्यथोऽसमस्तस्तंबे॥४५॥ समस्तस्तंबवर्जितेस्तस्यथोभवति ॥ हत्थो । थुई । थोत्तं । थोअं । पत्थरो । पसत्थो । अत्थि । सत्थि ॥ असमस्त स्तंबइतिकिं ॥ समत्तो । तंबो ॥स्तवेवा॥४६॥ स्तवशब्देस्तस्यथोवाभवति ॥ थवो । तवो ॥ पर्यस्तेथट्टौ॥४७॥ पर्यस्तेस्तस्यपर्यायेणथट्टौभवतः॥ पल्लत्थो । पल्लट्टो ॥ वोत्साहेथोहश्चरः॥ ४८ ॥ उत्साहशब्देसंयुक्तस्यथोवाभवति तत्सन्नियोगेचहस्यरः ॥ उत्थारो । उच्छाहो ॥ आश्लिष्टेलधौ ॥ ४९ ॥ आश्लिष्टेसंयुक्तयोर्यथासंख्यंलधइत्ये

वाभवति ॥ उब्भं । उद्धं॥ कश्मीरेम्भोवा ॥ ६० ॥ कश्मीरशब्दस्तेयुक्तस्यम्भोवाभवति ॥ कम्भारो । कम्हारो॥ न्मोमः ॥ ६१ ॥ न्मस्यमोभवति ॥ अधोलोपापवादः ॥ जम्मो । वम्महो । मम्मणं ॥ ग्मोवा ॥ ६२ ॥ ग्मस्य मोवाभवति ॥ युग्मं । जुम्मं । जुग्गं ॥ तिग्मं । तिम्मं । तिग्गं ॥ ब्रह्मचर्यतूर्यसौंदर्यशौंडीर्येर्यार्रः ॥ ६३॥ एषुर्य स्यरोभवति ॥ जापवादः ॥ बम्भचेरं । चौर्यसमत्त्वात्बम्भचरिअं । तूरं । सुंदेरं । सोंडीरं ॥ धैर्येवा ॥ ६४ ॥ धैर्ये र्यस्यरोवाभवति ॥ धीरं । धिज्जं ॥ सूरोसुज्जोइतितुसूरसूर्यप्रकृतिभेदात् ॥ एतःपर्यंते ॥ ६५ ॥ पर्यंतेएका रात्परस्यर्यस्यरोभवति ॥ पेरंतो ॥ एतइतिकिं ॥ पज्जंतो ॥ आश्चर्ये ॥ ६६ ॥ एतःपरस्यर्यस्यरोभवति ॥ अच्छे रं ॥ एतइत्येव ॥ अच्छरिअं ॥ अतोरिआररिज्जरीअं ॥ ६७ ॥ आश्चर्येअकारात्परस्यर्यस्य रिअ अर रिज्ज रीअ इत्येतेआदेशाभवंति ॥ अच्छरिअं । अच्छअरं । अच्छरिज्जं । अच्छरीअं ॥ अतइतिकिं ॥ अच्छेरं ॥ पर्यस्त पर्याणसौकुमार्येल्लः ॥ ६८ ॥ पर्यस्तपर्याणसौकुमार्यएषुर्यस्यल्लोभवति ॥ पर्यस्तं । पल्लट्टं । पल्लत्थं ॥ पल्लाणं । सोअमल्लं ॥ पल्लंकोइतिचपल्यंकशब्दस्ययलोपेद्वित्त्वेच ॥ पलिअंको इत्यपिचौर्यसमत्त्वात् ॥ बृहस्पतिवन

वाभवति ॥ उब्भं । उद्धं॥ कश्मीरेम्भोवा ॥ ६० ॥ कश्मीरशब्दस्तेयुक्तस्यम्भोवाभवति ॥ कम्भारो । कम्हारो॥ न्मोमः ॥ ६१ ॥ न्मस्यमोभवति ॥ अधोलोपापवादः ॥ जम्मो । वम्महो । मम्मणं ॥ ग्मोवा ॥ ६२ ॥ ग्मस्य मोवाभवति ॥ युग्मं । जुम्मं । जुग्गं ॥ तिग्मं । तिम्मं । तिग्गं ॥ ब्रह्मचर्यतूर्यसौंदर्यशौंडीर्यैर्यार्यैरः ॥ ६३॥ एषुर्य स्यरोभवति ॥ जापवादः ॥ बम्भचेरं । चौर्यसमत्त्वात्बम्भचरिअं । तूरं । सुंदेरं । सोंडीरं ॥ धैर्यैवा ॥ ६४ ॥ धैर्यै र्यस्यरोवाभवति ॥ धीरं । धिज्जं ॥ सूरोसुज्जोइतितुसूरसूर्यप्रकृतिभेदात् ॥ एतःपर्यंते ॥ ६५ ॥ पर्यंतेएका रात्परस्यर्यस्यरोभवति ॥ पेरंतो ॥ एतइतिकिं ॥ पज्जंतो ॥ आश्चर्यै ॥ ६६ ॥ एतःपरस्यर्यस्यरोभवति ॥ अच्छे रं ॥ एतइत्येव ॥ अच्छरिअं ॥ अतोरिआररिज्जरीअं ॥ ६७ ॥ आश्चर्यैअकारात्परस्यर्यस्य रिअ अर रिज्ज रीअ इत्येतेआदेशाभवंति ॥ अच्छरिअं । अच्छअरं । अच्छरिज्जं । अच्छरीअं ॥ अतइतिकिं ॥ अच्छेरं ॥ पर्यस्त पर्याणसौकुमार्यैल्लः ॥ ६८ ॥ पर्यस्तपर्याणसौकुमार्यएषुर्यस्यल्लोभवति ॥ पर्यस्तं । पल्लट्टं । पल्लत्थं ॥ पल्लाणं । सोअमल्लं ॥ पल्लंकोइतिचपल्यंकशब्दस्ययलोपेद्वित्त्वेच ॥ पलिअंको इत्यपिचौर्यसमत्त्वात् ॥ बृहस्पतिवन

स्पत्योःसोवा ॥ ६९ ॥ ॥ अनयोःरांयुक्तस्यरोनाभवति ॥ बहस्राई । बहप्फई । भयस्राई । भयप्फई ॥ वणस्सई । वणप्फई ॥ बाष्पेहोऽश्रुणि ॥ ७० ॥ बाष्पशब्देरांयुक्तस्यहोभवतिअश्रुण्यभिधेये ॥ बाहोनेत्रजलं ॥ अश्रुणीतिकिं ॥ बप्फोऊष्मा ॥ कार्षापणे ॥ ७१ ॥ कार्षापणेरांयुक्तस्यहोभवति ॥ काहावणो । कहंकहावणो ॥ हस्वःसंयोगइतिपूर्वमेवच्हस्वत्वेपश्चादादेशो ॥ कर्षापणशब्दस्यताभविष्यति ॥ दुःखदक्षिणतीर्थेवा ॥ ७२ ॥ एषुसंयुक्तस्यहोवाभवति ॥ दुहं । दुक्खं । परदुक्खेणदुक्खिआविरला ॥ दाहिणो । दक्खिणो ॥ तूहं । तित्थं ॥ कूष्मांडयांष्मोलस्तुण्डोवा ॥ ७३ ॥ कूष्मांडशब्दांष्माइत्येतस्यहोभवति ण्डइत्येतस्यतुवालोभवति ॥ कोहली । कोहण्डी ॥ पक्ष्मश्मष्मस्मह्मांम्हः ॥ ७४ ॥ पक्ष्मशब्दसंश्मिःरांयुक्तस्यश्मष्मस्मह्मांचमकाराकांतोएकारआदेशोभवति ॥ पक्ष्मन् । पम्हाइं । पम्हललोअणा ॥ श्म ॥ कुश्मानः । कुम्हाणो ॥ कश्मीराः । कम्हारा ॥ ष्म ॥ ग्रीष्मः । गिम्हो ॥ ऊष्मा । उम्हा ॥ स्म ॥ अस्मादृशः । अम्हारिसो ॥ निस्मगः । निम्हओ ॥ ह्म ॥ ब्रह्मा । बम्हा ॥ बम्हणो । बम्हचेरं ॥ क्वचित्म्भोपिदृश्यते ॥ बम्भणो । बम्भचेरं । सिम्भो ॥ क्वचिन्नभवति ॥ रश्मिः । रस्सी ॥ स्मरः । सरो ॥ सूक्ष्मश्न

ष्णस्नन्हह्णक्ष्णांण्हः ॥ ७५ ॥ सूक्ष्मशब्दसंबंधिनःसंयुक्तस्यश्नष्णस्नन्हह्णक्ष्णांचणकाराक्रांतोहकारादेशोभवति ॥ सूक्ष्मं । सण्हं ॥ श्न ॥ पण्हो । सिण्हो ॥ ष्ण ॥ विण्हू । कण्हो । उण्हीसं ॥ स्न ॥ जोण्हा । ण्हाओ । पण्हओ ॥ न्ह ॥ वण्ही । जण्हू ॥ ह्ण ॥ पुव्वण्हो । अवरण्हो ॥ क्ष्ण ॥ सण्हं । तिण्हं ॥ विप्रकर्षेतुकृष्णकृत्स्नशब्दयोःकसणो । कसिणो ॥ ह्लोल्हः ॥ ७६ ॥ ह्लस्थानेलकाराक्रांतोहोभवति ॥ कल्हारं । पल्हाओ ॥ कगटडतदपशषसःकः पामूर्ध्वेलुक् ॥ ७७ ॥ एषांसंयुक्तवर्णसंबंधिनामूर्ध्वेस्थितानांलुग्भवति ॥ क ॥ भुक्तं । भुत्तं ॥ सिक्थं । सित्थं ॥ ग ॥ दुद्धं । मुद्धं ॥ ट ॥ षट्पदः । छप्पओ ॥ कट्फलं । कप्फलं ॥ ड ॥ खग्गो । खड्गः ॥ सज्जो । षड्जः ॥ त ॥ उप्पलं । उप्पाओ ॥ द ॥ मद्गुः । मग्गू ॥ मोग्गरो ॥ प ॥ सुत्तो । गुत्तो ॥ श ॥ लण्हं । निश्चलो । चुअइ ॥ ष ॥ गोट्ठी । छट्ठो । निट्ठुरो ॥ स ॥ खलिओ । नेहो ॥ ःक ॥ दुःखं । दुक्खं ॥ ःप ॥ अंतःपातः । अंतप्पाओ ॥ अधोमनयां ॥ ७८ ॥ मनयांसंयुक्तस्याधोवर्तमानानांलुग्भवति ॥ म ॥ जुग्गं । रस्सी । सरो । सेरं ॥ न ॥ नग्गो । लग्गो ॥ य ॥ सामा । कुड्डं । वाहो ॥ सर्वत्रलबरामचंद्रे ॥ ७९ ॥ चंद्रशब्दादन्यत्रलबरांसर्वत्रसंयुक्तस्योर्ध्वमधश्चस्थितानांलुग्भवति ॥

ऊर्ध्वं ॥ ल ॥ उल्का । उक्का ॥ वल्कलं । वक्कलं ॥ ब ॥ शब्दः । सद्दो ॥ अब्दः । अद्दो ॥ लुब्धकः । लोद्धओ ॥ र ॥ अर्कः । अक्को ॥ वर्गः । वग्गो ॥ अधः ॥ श्लक्ष्णं । सण्हं ॥ विक्लवः । विक्कवो ॥ पक्वं । पिक्कं ॥ ध्वस्तः । धत्थो ॥ चक्रं । चक्कं ॥ ग्रहः । गहो ॥ रात्रिः । रत्ती ॥ अत्रद्वइत्यादिसंयुक्तानामुभयप्राप्तौ यथादर्शनंलोपः क्वचिदूर्ध्वं ॥ उद्विग्नः । उद्विग्गो ॥ द्विगुणः । बिउणो ॥ द्वितीयः । बीओ ॥ कल्मषं । कम्मसं ॥ सर्वं । सव्वं ॥ शुल्बं । सुव्वं । क्वचित्त्वधः ॥ काव्यं । कव्वं । कुल्या । कुल्ला ॥ माल्यं । मल्लं ॥ द्विपः । दिओ ॥ द्विजातिः । दुआई ॥ क्वचित्पर्यायेण । द्वारं । बारं । दारं ॥ उद्विग्नः । उव्विग्गो । उव्विण्णो ॥ अचंद्रइतिकिं ॥ चंद्रं । संस्कृतसमोयंप्राकृतशब्दः ॥ अत्रोत्तरेणविकल्पोपिनभवति निषेधसामर्थ्यात् ॥ द्रेरोनवा ॥ ८० ॥ द्रशब्देपरेरेफस्यवालुग्भवति ॥ चंदो । चंद्रो ॥ रुद्रो । रुद्दो ॥ भद्रं । भद्दं ॥ समुद्रो । समुद्दो ॥ ह्रदशब्दस्यस्थितिपरिवृत्तौद्रहइतिरूपं ॥ तत्र द्रहो । दहो ॥ केचिद्रलोपंनेच्छंति ॥ द्रह शब्दमपि कश्चित्संस्कृतंमन्यते ॥ वोद्रहादयस्तुतरुणपुरुषादिवाचकानित्यंरेफसंयुक्तादेश्याएव ॥ सिक्खंतुवोद्रही ओ । वोद्रहद्रहंमिपडिआ ॥ धात्र्याम् ॥ ८१ ॥ धात्रीशब्देरस्यलुग्वाभवति ॥ धत्ती ॥ ह्रस्वात्प्रागेवरलोपे धाई

पक्षे । धारी ॥ तीक्ष्णेणः ॥ ८२ ॥ तीक्ष्णशब्देणस्यलुग्वाभवति ॥ तिक्खं । तिण्हं ॥ ज्ञोञः ॥ ८३ ॥ ज्ञःसंबंधि
नोञस्यलुग्वाभति ॥ जाणं । णाणं ॥ सव्वज्जो । सव्वण्णू ॥ अप्पज्जो । अप्पण्णू ॥ दइवज्जो । दइवण्णू ॥ इंगिअ
ज्जो । इंगिअण्णू ॥ मणोज्जं । मणोण्णं ॥ अहिज्जो । अहिण्णू ॥ पज्जा । पण्णा ॥ अज्जा । अण्णा ॥ सज्जा ।
